सटीकं

अक्कमहादेवी शतकम्

○

लेखकः

डॉ परड्डी मल्लिकार्जुनः, एम्.ए., पिएच्.डी.

साहित्यरत्नम्

कर्नाटक विश्वविद्यालय संस्कृतविभागः

धारवाड – 580 003

○

प्रकाशकः

श्री जगद्गुरु गङ्गाधर धर्मप्रचारक मण्डलम्

मूरुसाविरमठः, हुब्बल्ली – 5800020

दिसम्बर – 1992

श्री जगद्गुरु मूरुसाविरमठीय ग्रन्थमाला - ३२३

सटीकं
अक्कमाहादेवी शतकम्

○

लेखकः

डाँ परड्डी मल्लिकार्जुनः, एम्.ए.,पिएच.डी.

साहित्यरत्नम्

कर्नाटक विश्वविद्यालय संस्कृतविभागः

धारवाड - 580 003

○

प्रकाशकः

श्री जगद्गुरु गङ्गाधर धर्मप्रचारक मण्डलम्

मूरुसाविरमठः, हुब्बल्ली - 5800020

दिशम्बर - 1992

Satikam Akkamahadevi Satakam by
Dr. Paraddi Mallikarjun
Department of Sanskrit,
Karnatak University, Dharwad - 580 003

Published by :
Sri Jagadguru Gangadbara Dharma Pracaraka Mandala,
Moorusaviramatha, Hubli - 5800020
Karnataka State (India)

© Author

First Edition : December 1992
Copies : 500

Price : Rs. Twenty Only (20/—)

Printer :
K. E. Board's Printing Press,
Dharwad - 580 001

परमपूज्यानां हुब्बल्ली मूरुसाविर मठाध्यक्षाणां
श्रीमन्महाराज निरञ्जन जगद्गुरुवर्याणां
श्री गङ्ग धरराजयोगीन्द्राणां

— आशीर्वचनम् —

न स्त्री स्वातन्त्र्यमर्हतीत्यादि स्मृतिवचनैर्ज्ञायते यत् प्राचीनभारतदेशे स्त्रीस्थानमाने हीनताप्रतीकेऽभवताम्। सूतकादिभिर्नैसर्गिकक्रियाभिः स्त्री शूद्रसमानासीदिति वक्तुं शक्यते। दायभागे विवाहकर्मण्यपि स्त्रीस्थानं कनिष्ठमेवासीत्। अतः स्त्रीदास्यविमोचनार्थं वीरशैवमते यः क्रान्तिबीज आगमादि ष्वकुंरितः तस्यैव सुमधुरं फलं द्वादश शतमानस्य शिवशरणानां विचाराचारक्रान्तौ नयनपथमायाति। यद्यवसरो दीयते महिलापि पुरुषवत् पुरुषार्थप्राप्तौ लौकिकपारलौकिकप्रगतिपथेऽग्रेसरा भवतीति सुविदितमेव।

श्री बसवेशस्थापिताल्लमप्रभुसंचालितानुभवमण्टपे यः शरणस्तोमः स्तूयते, तस्मिन् महिलानामपि संख्या गणनातीता वर्तते। तासु महिलासु शिवानुभवप्राप्तिकातरासु वीरविरागिणी अक्कमहादेवी धार्मिकदार्शनिकेतिहासाकाशे ध्रुवतारेव राजते। मीराबाईतुल्यास्या मधुरा भक्तिरेतद्वचनावलोकनेन स्फुटी भवति। दिगम्बरत्वेन वैराग्यपराकाष्ठापि दरीदृश्यते।

कदलीवने लिङ्गाङ्गसामरस्यं प्राप्तवत्या महादेव्याः वचन शतकस्य संस्कृतानुवादं कुर्वता डॉ परड्डी मल्लिकार्जुनेन सारस्वतो लोको दृढमुपकृतः। अस्य शरण साहित्य सेवा निरन्तरं विश्व-हितकारिणी भवतु, यदर्थे गुरु श्री गुरुसिद्धेश्वर एनमायुरारोग्य भाग्येन संयोजतु। यैरपि ग्रन्थस्यास्य प्रकटने सहाय्यं कृतं तानपि सर्वान् परशिवोऽवतु। शिवं भूयात्।

— विषयानुक्रमणिका —

आशीर्वचनम्	
प्रास्ताविकम्	V
सटीकं शतकं	1–109
श्लोकानुक्रमणिका	110–111
शुद्धिपत्रम्	111–112

— प्रास्ताविकम् —

लोकोपकारनिरताः विरत ग्रगण्याः
शम्भुप्रसाद भरिताः बसवेशमुख्याः ।
स्त्रीस्थानमानविषये स्मृतिकरदिष्ट-
दौर्गत्यखण्डनपराः जगदेकमान्याः ॥ 1 ॥

या सूतकादि सहजामयदोष पूर्णा
शूद्रोपमा भवति शास्त्रकृतावमाना ।
तामेव लोकजननीं शिववल्लभेति
यत्साधितं शिवमते सुधियां सुमान्यम् ॥ 2 ॥

लब्धोदया प्रकटितात्मबलाऽत्रलापि
यत्साधयत्यनुपमं पुरुषैरसाध्यम् ।
एतच्छिवानुभवमण्टपदर्शनीयं
स्त्रीणां यतः सबलता पुरुषैः समाना ॥ 3 ॥

वेदान्तकालकालितात्मविचारगोष्ठी-
तुल्यानुभावविषयप्रतिपादनास्था ।
अध्यात्मवादनिरता शिवभक्तिपूता
दृग्गोचरी भवति भारतदेशजाता ॥ 4 ॥

तेषु स्वतन्त्रमतिषु क्षितिमण्डनेषु
योषिद्गणेषु विरतिप्रमुखावकपूर्वा ।
देवी महत्पदविभूषितनामधेया[1]
चूडामणिः शिवकलत्रमतीतमाया ॥ 5 ॥

---

1 अक्कमहादेवी ।

श्री शम्भुभक्तिविमलीकृतपितृगर्भात्
जातोरुभक्तिरवनीतलमण्डनं सा ।
स्त्रीरूपधारिशिवभक्तिरतीवरम्या
साधुस्वभावजनचित्तहराऽभिरामा ॥ 6 ॥

बाल्ये यतः शिवरतिर्गिरिजेव पूता
एतद्‌विवाहविषये सभयाहि माता ।
लोकाभिरामवपुषा जितचन्द्रबिम्बां
संरक्षयामि कथमित्यतिचिन्तिताम्बा ॥ 7 ॥

क्रीडापि सैकतविनिर्मितलिङ्गमूर्त्या
गीतंच शम्भुगुणकीर्तनरम्यवर्णम् ।
भक्तिप्रधानकथनश्रवणैकमग्ना
चित्ते सदा शिवगुणस्मृतिरागभोक्ता ॥ 8 ॥

वाचा स्वकीयतनुना मनसेन्द्रियैश्च
शुद्धिं तनोति शरणैः सह वासमेत्य ।
भर्तारमात्मसदृशं गिरिजापतिं तं
मत्वा परं पुरुषमात्मसहोदरं च ॥ 9 ॥

राज्ञापि कौशिक इति प्रथितेन पश्चात्
रागान्वितेन विरता बसव प्रभावात् ।
वस्त्रं विहाय भवबन्धनमूर्तरूपं
शम्भुप्रसादरसिका शिवभक्तगोष्ठीम् ।।
श्री अल्लमादि शरणैश्च निरीक्ष्यमाणा
कल्याणपावनपुरे सहसा प्रविष्टा ॥ 10 ॥

निन्द्यं शरीरमिदमामयपूर्णमेव[2]
राजोपदेशकृतयेऽपि पुनर्विवस्त्रा ।
तादृक्स्वरूपमपि रन्तुमनास्तदानीं
वृत्तिं शुनोऽप्रकटयान्नरदेहवासी ॥ 11 ॥

लिङ्गैकनिष्ठमनसा भवतापदूरा
भक्तैकबन्धुमबलां सबलांममायाम् ।
जिज्ञासवः सकललोकहितैकसक्ताः
पृच्छन्ति नैकविद्यमात्मरताः विरक्ताः ॥ 12 ॥

कायं हि वस्त्ररहितं सहसाविलोक्य
'मा भूद्विकार' इति सा सदया स्वकीय-
कामेन्द्रियं शिरसिजावृतमेवमुक्त्वा
तत्प्रीतिपात्रमभवन्मदनारिरक्ता ॥ 13 ॥

योगाङ्गसिद्धिचतुरा शिवयोगपूर्णा
देहाख्यरम्यकदलीवनगूढवासम्[3]
श्री मल्लिकार्जुनपतिं हृदयाब्जगुप्तं
अन्वेषयत्यनुदिन विरहाग्नितप्ता ॥ 14 ॥

तस्य स्वबान्धवगणस्य सहायमेव-
माशीर्वचः शुचिमतिः शुभकामनांच ।
लब्ध्वा शिवं निजपतिं प्रति गन्तुकामा
मातुर्गृहं त्यजति सा निजकान्तरक्ता ॥ 15 ॥

---

2 अक्कमहादेव्याः नवमं वचनमत्रावलोकितव्यम् ।

3 सप्तनवतितम-(97) वचनावलोकनं कार्यम् ।

बाल्यात्प्रभृत्यनुदिनं रमणं रमेशं
मत्वा सहोदरगणं पुरुषान्तराणि ।
मीरा यथा मधुरभक्तियुता प्रसिद्धा
भर्तारमैच्छदतुलं शिवयोगिनी सा ॥ 16 ॥

श्रीशैलरम्यकदलीवनमप्रमेयं
अध्यात्ममेरुसदृशं परमं प्रविष्टा ।
लिङ्गाङ्गसङ्गसुखलाभमनाश्तदैक्यं
सौख्यं च शाश्वतमहो लभते तदन्ते ॥ 17 ॥

अल्पे वयस्यतुलसिद्धिमवेक्ष्य सन्तः
आश्चर्यपूर्णहृदयाः शिवभक्तिमन्तः ।
तामग्रजां शिवरतां प्रवदन्ति मान्याः

प्रीणाति यः परशिवं भुवने स धन्यः ॥ 18 ॥
साऽलौकिकी शिवकला भुवनावतीर्णा
उद्धर्तुमेव सकलां मनुसन्तर्ति या ।
अम्भोदजाततडिदंशु विलासरम्या
लीना पुनर्गिरिसुतारमणेऽसमाना ॥ 19 ॥

वैराग्यापरनामधेयमसमं भक्तिप्रभामण्डनं
ज्ञानज्योतिरिहावतीर्णमभवत् स्त्रीरूपमत्यद्भुतम् ।
कामारात्यनुरागपूर्णमनसा प्रापञ्चिकं यत्सुखं
मोक्षार्थं च विहाय पावनता श्रीशैललीनाभवत् ॥ 20 ॥

पाषाणोदरवर्तिकाञ्चननिभं द्रव्यं यथा भूतले
तैलंचापि तिरोहितं तिलगणे लीना रुचिर्या फले।
भावान्तर्गमनादमेयविषयं ब्रम्ह प्रभामण्डलं
किं ज्ञातुं प्रभुमल्लिकार्जुन !
नरः शक्तो विदग्धोऽमलः ॥ १ ॥

अव्यक्तरूपः परमात्मसंज्ञः
सच्चित्स्वरूपो जगदेककर्ता।
आनन्दपूर्णः शरणप्रसन्नः
शिवोऽस्य सत्तां प्रकटीकरोति ॥

सर्वत्र वर्तमानोऽपि शंकरः निगूढरूपः शरणानुभवैकगोचरः भवतीति साधयितुं भगवत्सत्तास्वरूपंच वर्णयितु अक्कमहादेवी पद्येस्मिन्नुदाहरणचतुष्टयमुल्लिखति- (१) पाषाणगर्भे निभृतं काञ्चनम्। (२) भूतले निहितं द्रव्यं। (३) तिलगणे विद्यमानं तैलं तथा। (४) फलान्तर्गता रुचिः।
गीतायां भगवत्सद्भाववर्णनमेवं वर्तते-

"पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।"
भगवतः सर्वव्यापकत्वमीशावस्योपनिषदीत्थं वर्णितम्-
ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुंजीथा मागृधः कस्यस्विद्धनम् ॥
श्वेताश्वतरोपनिषद्वाक्यमिदमपि स्मर्तव्यम्-
"सर्वव्यापिनमात्मानम् क्षीरे सर्पिरिवार्पितम्"

सर्वव्यापकत्वाच्छिवः वीरशैवदर्शने स्थलशब्दवाच्यो भवति। अयमेवाशयः श्री बसवेश्वरशतकादिमे श्लोके व्यक्तीकृतः—

अम्भोधिगर्भनिभृतज्वलन प्रभेव
सस्ये यथा रसरुचिर्मधुराविशिष्टा।
गन्धस्तु कुड्मल इव प्रभुसंगमेश
कन्यानुरागसदृशी तव देव सत्ता ॥

— × —

देहोपद्रवकारिणी च सततं छायेव माया तव
प्राणायासकरी प्रलोभनकरी माया मनोरूपिणी ।
चित्तायासकरी सदागतिरियं स्मृत्यादिरूपा नवा
त्वन्मायां प्रभुमल्लिकार्जुन जयेत् कोवाक्षितौ
मानवः ॥ २ ॥

ईश्वरमायाशक्तिस्वरुपमत्र वर्णितम्। मायाधीनाः सर्वे प्राणिनः देहेन्द्रियादिषु ममत्वमनुप्रपन्नाः संसाराध्वनि सदेवा- विश्रान्तं परिभ्रमन्तीति वेदान्तिनां सर्वेषामपि मतम्। ईश्वर-माया यद्यपि दुरतिक्रमा तथापीश्वरः प्रसन्नस्तया मयया भक्तान् मोचयति। ईश्वरमायादुरतिक्रमत्वविषये गीतोक्ति-रियम्–

दैवीह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।

संसारनिर्माणादिविधौ समर्थेश्वरशक्तिस्तुतिरित्थं मल्हणस्तोत्रे लभ्यते–

मायाप्रपञ्चरचना चतुरा समस्त-
वस्तुप्रभेदभिदुरा शिव सर्वकर्त्री ।
संसार पाशविषमञ्छिदुरा नराणां
मोहान्धकारभिदुरा च तवैव शक्तिः ।

माय्यपि मायातीत ईश्वरः। षडक्षरदेवः स्वोवशिवस्तव-मञ्जर्यामित्थं ब्रवीति–

'मायीदेव विमायतामुपगतः को वेत्ति तत्त्वां भुवि'। ययानन्तशक्तिमानात्माऽल्पशक्तिरिति भ्रमाधीनो भवति सा मायेति कथ्यते।

— × —

जेतुं सा नहि शक्यते क्षितितले मायानुगा संयुता
योगीन्द्रस्य सदा मुदासहचरी भूता ततो योगिनी ।।
तं तं संयमशालिनं स्तुतिमया संमोहयत्यैश्वरी
तस्याः न प्रभुमल्लिकार्जुन बिभेम्येषा

विरक्ता यतः ।। ३ ।।

माया केन केन प्रकारेण शरीरिणो मोहयतीत्यत्र सम्यग् वर्णितम्। योगीन्द्रं योगिनी भूत्वा संयमिनं स्तुतिर्भूत्वा विमोहयति। स्त्रीवशामोहपराः सर्वे जना इति सुविदितमेव। योगिनोपि मायामिमां जेतुं न शक्ताः इति व्यावहारिकं सत्यम्। स्तुति वशं ये न यान्ति, तेषामभावः सर्वत्र दृश्यते। स्तुतिर्नाम प्रियवाक्यप्रदानमिति वक्तुं शक्यते। उक्तंचात्र–

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति मानवाः।
तस्मात्तदेव दातव्यं वचने का दरिद्रता।

किन्तु शिवानुग्रहबलादविद्यानाशेन माया जेतुं शक्यते इति यदुक्तं अक्कमहादेव्या तदतीव समंजसम्। शिवानुग्रहं विना देहिनां मुक्तिलाभोऽशक्य इति विषये शिवस्तवमंजर्यामुक्तं–

प्रख्यातः किल भक्तवत्सल इति स्थाणो पुराणादिभिः
त्वं ते देव विना प्रसादमनघं मुक्तिः कथं देहिनाम्।
तस्माद्भक्तित एव सर्वकरणैर्यत्ते प्रसादाप्तये
कार्यं त्वत्पदसेवनं किमपरैः संक्लेशकर्मोर्मिभिः ।।

एकं मे च शरीरमिन्द्रिययुतं चित्तं ममैकं चलं
येन त्वत्स्मरणे प्रपञ्चविषयासक्तौच्च शक्ताऽबला ।
नो लभ्यं सुखमैहिकं चिरतरं नोपारमार्थं सुखम्
नैवं वा प्रभुमल्लिकार्जुन ! सुखी भूयात्
युगोपासकः ॥ ४ ॥

शरीरमेकं मनश्चाप्येकम् । तद्यदि सांसारिकविषयेषु आसक्तं शिवध्यानादिकं कर्तुं कथं शक्नोति ! एकेनैव मनसा ईश्वर-ध्यानं विषयचिन्तनं कर्तुमशक्यं, तथैवैकेन शरीरेण शिव पूजादिकं संसारसुखस्वादेन सहैव कर्तुमशक्यम् । एवमुभय चिन्तया नोभयप्राप्तिः प्रत्येकं हानिरिति युक्तियुक्तमुक्तम् । अत्र कबीरदासोपि भणति–

पेयस्तया प्रेमरसो विशिष्टः
मानेऽपि ते रक्षणबुद्धिरेषा ।
खड्गद्वयं कोशगतं कथं स्यात्
नैतच्छ्रुतं दृष्टमिदं कदापि ॥

संसारार्तिरियं सदा सहचरी छायेव कायं च किम् ?
नित्यं तापकरी करोमि विवशा किं मूढधीः स्वेच्छया ।
तप्तं पालयितुं न चास्मि सफला तुच्छं शरीरं स्वकम्
स त्वं मे प्रभुमल्लिकार्जुन ! भव प्रेम्णा कृपालुः
स्वयम् ।। ५ ।।

संसारहेयस्थलान्तर्गतमिदं वचनम् । परिणामतापसंसाररूपैः त्रिविधैर्दुःखैः सदा पीड्यमाने नरे संसारहेयताबुद्धिः जाग्रता भवति । विना शिवानुग्रहं संसारतापशमनं न शक्यमिति मत्वा तमेव शरणं प्रपद्यते । विवेकी क्षणिकमैहिकंसुखं स्वर्गादि पारलौकिकं सुखं न कांक्षंत इति शिवयोगीश्वराचार्यो वदति–

ऐहिके क्षणिके सौख्ये पुत्रदारादि सम्भवे ।
क्षयित्वादियुते स्वर्गे कस्य वाञ्छा विवेकिनः ।।

कर्मवशाज्जातो जन्तुस्तापत्रयाग्निदह्यमानो शिवस्मरणं करोति तापत्रयपरिहारार्थम् ।

'तापत्रय महावह्नि संतापाद्दह्यते भृशम्'। इति सिद्धान्तशिखामणिवचनानुसारेण पूर्वजन्मकृतपुण्यविशेषेण च संसारहेयतामतिरुत्पद्यते । अत एवोक्तं सिद्धान्तशिखामणौ–

निरस्तहृत्कलंकस्य नित्यानित्यविवेकिनः ।
संसार हेयता बुद्धिर्जायते वासनाबलात् ।

गीतोक्तार्जुनविषादयोगवत् शिवशरणस्य संसारहेयताबुद्धिर्जायते इति वक्तुं शक्यते ।

जाताहं भुवि घोरबन्धनकरी सार्धं मया दुर्मतिः
आशा मोहकरी तया च भुवने कोपस्तया जायते ।
कोपान्धा खलु दर्शने च भवतः शक्ता कथं चंचला
शोकार्तां प्रभु मल्लिकार्जुन ! भवान् मां
पालयेल्लालयेत् ॥ ६ ॥

अज्ञानवशाल्लब्धजन्मनः आशानिवार्या भवति । आशया क्रोधस्ततो मोहस्ततः शिवध्यानवर्जनमिति मनुष्याणामधोगति क्रमो निरूप्यते । एवमेव गीतायामपि प्रणाशक्रमः सूचितः-

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥
क्रोधाद् भवति संमोहः संमोहात् स्मृति विभ्रमः
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ॥

अतः ज्ञानसूर्येणाज्ञानतिमिरं नाशनित्वा मनः स्ववशेकृत्वा शिवध्यानरतो भूत्वा तच्छरणंगतः संसारचक्रात् विमुक्तो भवतीति साधितम् ।

निजकर्मानुसारतः शरीरिणः संसारेऽस्मिन् परिभ्रमन्तीति सम्यगुक्तं सिद्धान्तशिखामणौ-

चक्रनेमिक्रमेणैव भ्रमन्तीति शरीरिणः ।
जात्यायुर्भोगवैषम्ये कारणं कर्म केवलम् ॥

क्रीडार्थं सकलं जगत्त्रयमिदं यः सृष्टवान् लीलया
नान्मायोनियंन्त्रणे च सततं यः क्षिप्तवान् स्वेच्छया ।
पर्याप्तं च जगद्विलासनमिदं येन त्वया चिन्तितं
माया ते प्रभुमल्लिकार्जुन! हठाद् दूरीकृतासौ ततः ॥७॥

'जन्माद्यस्ययतः इति बादरायण वेदान्तसूत्रे जगत्सृष्टिः भगवता कृतेति सूच्यते। स्वीयलीलाविनोदार्थमेव जगतः सृष्टिरिति वेदान्तिनामभिप्रायः यद्यपि जगन्मिथ्यात्ववादेऽभिप्रायभेदो वर्तते। नानायोनिनियन्त्रणे जीवानसौ क्षिपतीति भगवतः स्वेच्छाचारो वा क्रूरता वा न मन्तव्या। जीविनां योनियन्त्रणं स्वयंकृतापराधतयैव सम्भवतीति यदि गृह्यते, भगवतो न्यायपक्षपातः सुष्टु व्यक्तीभवति ।

ममस्माया दुरत्ययेति यदुक्तं भगवता श्री कृष्णेन भगवद्गीतायां तस्याप्ययमेवार्थः। इयमेव माया शिवस्य धर्मचारिणीति सिद्धान्तशिखामणावुक्तं यथा–

यया मवेश्वरः शम्भुर्नामिरूपादिसंयुतः।
तस्यै मायास्वरुपायै नमः पावनशक्तये ।।

भ्रमापरनाममायथावृतः भगवान् शरीरवानपि न दृश्यते इति कबीरदासोऽपि भणति ।

अन्वेषणे यस्य जगद्भ्रमस्ते
शरीरवासी तव देवदेवः।
मायावृतो यावदयं हि लोको
ज्ञेयो न तावद् भवता महेशः ।।

स्वस्नेहात्कृततन्तुजालनियतो ह्यष्टापदः स्वेच्छया
तन्त्वावेष्टनदुःखितस्य सततं मृत्युं यथा गच्छति।
चित्ताशाशतपीडिता दृढतरं बद्धा भवेयं भवे
संत्रस्तां प्रभुमल्लिकार्जुन ! कृपापात्रं तथा
पाहिमाम् ॥ ८ ॥

आशापाशशतैर्बद्धः धावन् भूमितलेऽ निशम्।
खेदं महदवाप्नोति मानवो मोहपीडितः ॥

आशाश्रृंखलाबन्धनवैचित्र्यं वर्णितं कविना यथा–

आशानाम मनुष्याणां काचिदाश्चर्यश्रृंखला।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ॥

अष्टापदः स्वेच्छया स्वनिर्मिततन्तुजालबद्धो यथा भवति तथा मानवोऽपि आशापाशतः बद्धः खेदं परमुपैतीति दृष्टान्तद्वारा स्पष्टीकरोति अक्कमहादेवी। खिन्नाहं भगवद्दयापात्रं भवामीति यदुक्तं तया आर्तभक्तस्य लक्षणमाविष्कृतं भवति। भगवद् भक्तानां चतुर्विधस्वभावो गीतायां वर्णितो यथा–

चतुर्विधा भजन्ते मां जनाः सुकृतिनोर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानीच भरतर्षभ।

आपन्मग्नः एव विशेषतः भगवत्स्मरणं करोति इति व्यावहारिकं सत्यम्। उक्तं चात्रकबीरदासेन–

शुचि स्मरन्त्येव नरा सुरेशं
सुखे पुनर्विस्मरणं नराणाम्।

सुखेऽपि यो वा स्मरति प्रभुं तं
कथं भवेत्तस्य शुचोऽवतारः ।।

एतदेव कविनैकेन सुष्ठु भणितं–

आपत्सु मग्नः स्मरणं त्वदीयं
करोमि मातः करुणामये शिवे ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति ।।

— × —

मूत्रामेध्यघटोऽस्थिपञ्जरमिदं पूयप्रपूर्णंवपुः
नानारोगमयं विनाशिनममुं कायंच धिङ्निष्फलम् ।
काये कामुकलालिते न भवतो मोदो वृथा सुन्दरे
मोहान्धः प्रभुमल्लिकार्जुन ! यतस्तत्स्नेहनष्टो
नरः ॥ ९ ॥

यदर्थे मानवः पापानि कुरुते तस्य शरीरस्य दुर्दशां हेयतां च वर्णयति। शरीरधारणमेव प्रथममपराधः। तस्मिन् पुनः मोहो यदि भवति देहिनो दुरावस्था प्रकटीभवति। अमेध्यादिपूर्णं घटं वीक्ष्य न कोपि पण्डितः मोदमेति। नागानन्दनाटके अयमेवाऽशयः सुष्टु स्पष्टीकृतः-

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ।।

नियमान्तर्गतशौचविवरणे शरीरमालिन्यं प्रति वैराग्यबुद्धिर्जायते साधकस्येति भगवता पतंजलिना साधु भणितम्शौचात् स्वांगजुगुप्सा परैरसंसर्गः।

एवं मलाकीर्णं देहं वीक्ष्य यदि वैराग्यं नोदेति, वैराग्यकारणं तस्य किं भवति ?-

स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।
विरागकारणं तस्य किमन्यदुपदिश्यते ।।

संसारहेयस्थलान्तर्गतवचनेऽस्मिन् कायाशुचित्वबुद्ध्या जायमानस्य विरागस्य वैराग्यस्यच सूचना भवति ।

संसारहेयस्थलान्तर्गतः श्लोकः एकः सिद्धान्तशिखामणावप्यस्ति—

मलकोशे शरीरेऽस्मिन् महादुःखविवर्धने ।
तडिदंकुशसंकाशे कोवा मोदेत पण्डितः ।।

— × —

नानायोनिसमुद्भूवा पुनरहं क्लेशव्यथाबाधिता
अस्मिन् जन्मनि मानवी च सुमतिर्जातानुकंपा तव।
यद्वाप्यस्तु पुराणजन्मकथनं सद्यो नवे जन्मनि
मामित्थं प्रभुमल्लिकार्जुन ! सदा त्वं तां पुनः
पालय ॥ १० ॥

अनेकजन्मदुःखानां पीडया ताडितो नरः।
भविष्यद् दुःखनाशार्थं यतेत यदि पण्डितः ॥

प्रारब्धस्यातीतत्वात् अनुभूयमानत्वस्य आगामि (अनागत) नो दूरीकरणमेव साध्यं साधु च। प्रारब्धसंचितादीनां स्वरूपं यदि ज्ञायते तदानागत दुःखदूरीकरणे मतिर्जायते। अपरिग्रहस्थैर्यादेव जन्मकथान्तर संबोधस्तेनागामिनो दुःखस्य पुनर्जन्मरूपस्य नाशः शक्यो भवति। पुराणजन्मकथनं यद्वाप्यस्तु, अस्मिन् जन्मनि वर्तमानां मा रक्षयित्वा पुनर्जन्म परिहारस्त्वया कार्यं इति भगवन्तमत्र प्रार्थयति। एतैः दुःखैराध्यात्मिकादिभिः पीड्यमानस्य स्वर्गे भूमौ वापि सुखं न विद्यतेऽत्र प्रमाणम्–

दुःखैरेतैरुपेतस्य कर्मबद्धस्य देहिनः।
स्वर्गे वा यदि वा भूमौ सुखलेशो न विद्यते ॥

अस्थिरासु कर्ममूलासु संपत्सु वैराग्यबुद्धिः पुण्यविशेषेणैव भवतीति सिद्धान्तशिखामणावुक्तं–

निरस्तहृत् कलङ्कस्य नित्यानित्यविवेकिनः।
संसारहेयता बुद्धिर्जायते वासना बलात् ॥

सङ्घातच्युत कुञ्जरो गिरिवरं विन्ध्यं यथा वाञ्छति
कीरः पञ्जरवासपीडितमनाः स्वीयान् यथा बान्धवान् ।
त्वामेवं सततं स्मरमि विरहात् तप्तात्वदीयादहम्
स्वात्मानं प्रभुमल्लिकार्जुन ! मुदा
संदर्शयात्यद्भुतम् ॥ ११ ॥

अविवेकतः संसारबन्धपीडितोऽपि पूर्वजन्मकृतसुकृतबलात् लब्धविवेकः संसारान्मुक्ति लब्धुमना परित्राणाय हरं रारटति । मुमुक्षोरार्तरवं मल्हणस्तोत्रे सुष्ठुव्यक्तीकृतम्—

"मूढो विवेक विकलः सकृदूर्ध्वबाहुः
किं न शृणोपि यदहं हर रारटामि ।
मां तत्र कर्मणि नियोजय देव येन
संसार चक्रगहनं न पुनर्विशामि ॥"

"यूथभ्रष्टो गजो विन्ध्यं पञ्जरे निहितः शुकः ।
स्वीयबन्धुगणं यद्वत् तद्वद्भक्तः शिवं स्मरेत् ॥"

अर्थात् गजशुकोदाहरणद्वारा भक्तस्य शिवदर्शनलालसोपमालंकारबलात् साधु दर्शिता । शिवस्मरणदर्शनोत्कटाशाविषये बसवेश्वरोऽपि ब्रवीति—

चिन्ताकुलो भवति चन्द्रकृते च कोरः
अम्भोजिनी च सततं रविकातरेयम् ।
चिन्तामयः कुसुमरागकृतेऽलिवर्गः
श्रीसंगमेश स्मरणेऽस्मि तवाभिलाषी ॥

लोकानां विविधक्रियासु भगवान् सूर्यो यथा प्रेरकः
अंगानां विविधक्रियासु सततं चित्तं तथा कारणम् ।
चित्तं तादृशमस्ति मामकमिदं ह्येकं पुनस्तद्यतो
लीनं चेत् प्रभुमल्लिकार्जुन ! भगत्पादे
कुतो मे भवः ॥ १२ ॥

"मनएव मनुष्याणां कारणं बन्धमोक्षयोः" इति सूक्तिः मनुष्यस्य चित्तवृत्तिनिरोधात्मकयोगसमाधेरावश्यकता मानव-मुक्तौ भवति। अष्टांगयोगापरनामा राजयोगो हठयोगो वा दुष्कर इति सर्वेषामेवाभिप्रायः। ईश्वरप्रणिधानाद्वेति पातञ्जलयोगसूत्रे भक्तिसुलभत्वमीश्वरस्य सूचितम्।

लोकचेष्टाकारणं यथारविः शरीरेन्द्रिय क्रियाप्रवृत्तं यावत् चित्तं, तावत् मानवो बन्धनान्मुक्ति प्राप्तुं न शक्नोति। शिवयोगापरनामधेयभक्तियोगात् चित्तस्यैकाग्रतां साधयितुं सुलभम्। ईश्वरप्राप्तिरपि भक्तियोगात् सुलभेति विदुषामभि-प्रायः। कालिदासोऽत्र भवति–

"स स्थाणुः स्थिरभक्तियोग सुलभः" इति। अर्थात् शिवपाद-स्मरणमग्ने चित्ते चाञ्चल्याभावान्मुक्तिः सुलभा भवति। स्थिरभक्तिर्विधिविहीनापि मुक्तिकारणमित्यत्र कण्णप्पादि शिवभक्तानां उदाहरणानि सन्त्येव। मल्हणस्तोत्रे सूक्तं–

चर्याविबोधरहिता भवभक्तिमात्रा-
न्नीतास्त्वया शिवपुरं यदहोकिराता: ।
जातिस्मरत्वमथवा परमामरत्वं
तेषां विमुक्तिरथवा भवतः प्रसादात् ।।

— × —

भूमिर्भूमिसमागता न भविताऽकाशो नभः संगतं
वारा वारि समागतं न भविता यावद् रसाद्यं क्षितौ ।
तेजस्तेजसमागतं न मरुता वायुश्चलः प्रेरकः
तावत् हे प्रभुमल्लिकार्जुन ! नरैः कार्यं
तवाराधनम् ॥ १३ ॥

पञ्चभूतात्मको देहो नश्वरश्च नृणां क्षितौ ।
पञ्चत्वं सत्वरं याति तत्पूर्वं शिवपूजनम् ॥

आयुरल्पं बलं चाल्पं ज्ञानं बिन्दुनिभम् पुनः ।
वार्धक्ये शिवपूजेति मृत्युमेति नराधमः ॥

यावदायुर्मनुष्याणां शरीरं सुदृढं भवेत् ।
तावदेवैश्वरी भक्तिः सपर्यापूर्वकं भवेत् ॥

नवे वयसिशान्तश्चेत् शिवपूजादितत्परः ।
शिवानुग्रहतो मोक्षं भजते लोकवन्दितः ॥

वयोवार्धक्यक्षीणस्तु मृत्युभीतियुतोल्पधीः ।
शिवव्रतादि सत्कार्ये समर्थो न भवेद् भुवि ॥

अत एवोक्तं साधु बसवेश्वरेण–

दन्तावलीच गलिता त्रिवली कपोले
जीर्णं शरीरमधमं नतमेव पृष्ठम् ।
सा यष्टिका करतले परतन्त्रवृत्तिः
श्री संगमेश ! नव यौवन एव भक्तिः ॥

उक्तं चान्यत्र–

वैराग्यं कस्य न प्रेयो विरागो यदि जायते। बाल्यादिषु मूढतादिभिः शिवपूजनं न कृतमिति षडक्षरकविना यत्प्रोक्तं तत्सर्वमेषमस्माकं कृते समीचीनम्–

बाल्ये मूढतया हृषीकविषय व्यापारतो यौवने
वार्धक्ये शिथिलाखिलांगकरणे जाड्यातिरेकादपि ।
पत्युस्ते पदपूजनं पुररिपोर्नानुष्ठितं सर्वदा
दुर्दान्तेन मयाहिता हृतधिया शून्यं पशुं पाहिमाम् ।।

(शिवस्तव मञ्जरी)

— × —

कासारं तृषितं यथा जलधरो धाराशतैस्तोषयेत्
शुष्कः सस्यगणः सकालजलदैः संवर्धितः पोषितः ।
तद्वद् भुक्तिविमुक्तिदानरसिको मामेति कल्याणदः
आचार्यं प्रभुमल्लिकार्जुन ! गुरुः ख्यातास्मि
धन्या यतः ॥ १४ ॥

गुरुकारुण्यस्थलान्तर्गतमिदं वचनम्। पूर्वजन्मकृतैः पुण्यैः गुरुकारुण्यं क्षितौ भवेत्। शिवज्ञानदर्शनादिहेतुः गुरुरेवेति गुरुगरिमा सर्वैरपि गीयते। बसवेश्वरोऽत्र ब्रवीति–
"यथाभरणं क्रियार्थं सुवर्णस्यावश्यकता भवति तथा शिवपथज्ञानार्थं गुरुपथावश्यकता भवति। अत एव भक्तिमुक्ति प्रदश्चरन् शिवो गुरुरित्थं प्रशंस्यते–

गुरुर्ब्रम्हा गुरुर्विष्णुः गुरुर्देवः सदाशिवः ।
गुरुः साक्षात् परब्रम्ह तस्मै श्री गुरवे नमः ।।

अत एव कबीरदासः गुरुदेवयोर्मध्ये गुरुवन्दनं प्रथमं क्रियतामिति ब्रवीति–

गोविन्दश्च गुरुश्चैव
पुरो यदि समागतौ ।
प्रथमं सद्गुरुं वन्दे
दर्शितो येन माधवः ।

सिद्धान्तशिखामणावप्युक्तं–

अप्रत्यक्षो महादेवः सर्वेषामात्ममायया ।
प्रत्यक्षो गुरुरूपेण वर्तते भक्ति सिद्धये ।।

दाता मे गुरुरस्ति लिङ्गपरिणेताहं वधू नूतना
भक्तास्ते पितरः मम त्रिभुवनालंकार भूता पुनः ।
तैर्दत्ता सदयं शिवाय विभवे लिङ्गात्मने कन्यका
कश्चिन्मे प्रभुमल्लिकार्जुन ! पुमान् नेष्टः
पतिर्लौकिकः ।। १५ ।।

"लिङ्ग पतिः सती भक्तः" इति वीरशैवसिद्धान्तानुसारं अक्क-महादेवी स्वीयं शिवपरिणयं विवृणोति-

लिंगरूपी शिवःसाक्षात् परिणेता भुविस्मृतः ।
अंगनामान्तरख्यातः सद्भक्तः कुलजो वधूः ।
गुरुर्दाता पिता माता बान्धवा भक्त संकुलः ।
शिवादन्यो पतिर्नास्ति त्रिषु लोकेषु कश्चन ।।
तमेव शरणं यातु पशूनां पतिमीश्वरम् ।

सूफी मतानुसारं परमात्मैव प्रियतमा जीवात्मनोऽखिलाः तत् प्राप्तिकामाः श्रुताः । एषा मधुरभक्तिः (दाम्पत्यप्रेमरूप) मीरायामपि दृश्यते । उक्तंच मीरालहर्याम्-

प्रक्षाल्य प्रतिमां स्वमानसपतेर्गोपालचूडामणेः
नेपथ्यं तनुते सुगन्धनिचयैरालिप्य यत्नेन सा ।
सौवर्णाम्बर रत्नभूषण सुमस्रग्भिश्च संपूज्य तां
श्रीकृष्णप्रभुकीर्तनामृतरसो गर्भान्तरे लीयते ।।

कान्तस्त्वं भव इत्यनन्यमनसा तप्तं तपः सन्ततं
भस्मालेपनमज्जनं रुचिकरो वैवाहवेषो मम।
इत्थं श्रीप्रभुमल्लिकार्जुनधवा दातागुरुर्मेपिता
सर्वेभक्तागणा विभूषितधरा मे
बान्धवास्तत्वतः ॥ १६ ॥

लिङ्गः पतिः शरणः सतीति न्यायेन लिङ्गरूपः शिवः एव पतिर्भवितु मर्हति। तत् प्राप्तयेऽनेकजन्मार्जित तपोबलमावश्यकम्। बहुजन्मकृतपुण्यपाकेन नष्टमलो जीवः पिण्डशब्दवाच्यो भूत्वा लिङ्गधारणयोग्यो भवतीति विरशैवसिद्धान्तम्। उक्तंचात्र सिद्धान्तशिखामणौ–

बहुजन्मकृतः पुण्यैः प्रक्षीणे पाप पंजरे।
शुद्धान्तः करणो देही पिण्ड शब्देन गीयते।

एतत् 'तप्तं तपः सन्ततम्, इति वाक्यांशेन सूच्यते। शिवकारुण्या-देवैश्वरीभक्तिः प्रजायते। उक्तं च–

"जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी।"
'सिद्धान्तशिखामणिः'

शिवकारुण्यप्राप्त्यर्थं तपश्चरणं परमावश्यकमिति सर्वेषामभिमतम्।

लिङ्गादि योगसुज्ञान प्रदाता गुरुसत्तमः।
येन भक्तकरे तिष्ठत्यखिलात्मा सदाशिवः॥

पानीयाख्यविशालमण्डपतले वैश्वानराख्या नवा
वेदी साधुविभूषिता शुभकरा वर्षोपलालंकृता ।
दाम्पत्यं चिरमस्ति नौ विरहजं दुःखं क्वचिन्नावयोः
धन्याहं प्रभुमल्लिकार्जुन ! यतस्त्वं मे पतिः
शाश्वतः ॥ १७ ॥

लिङ्गाङ्गसंयोगरूपं दाम्पत्यं लौकिकाद्भिन्नमेवेति सम्यक् सूचितमत्र। जलनिर्मितं विशालमण्डपतलं, अग्निरूपा नवा वेदी, वर्षोपलालंकृतिरद्भुता, इत्यादि विवाहरचना अपूर्वा वर्तते। शिवानुभवबोधायेदृशी भाषाऽनिवार्या भवति। अर्थात् अन्यादृशमेव लिङ्गाङ्ग संयोगरूपं दाम्पत्यम् ।

आयुर्भोगकरी हि मानवजनिः शैवीकृता सद्गुरो
घोरं मे भवबन्धनं शिथिलितं प्राप्तं सुखं शाश्वतम् ।
हस्ते मे प्रभुमल्लिकार्जुन इतो बद्धस्तवेदृक् कृपा
लेशात् त्वामहमानतास्मि सततं जाता कृतार्था
यतः ॥ १८ ॥

शिव एव गुरु लिङ्गजङ्गमरूपेण भक्तपूज्यो भवतीति सुविदितमेव । गुरुकारुण्यगरिमात्र गीयते । नरजन्मनो हरजन्मना परिणतिः गुरुकृपयैव साध्या । हस्ते इष्टलिङ्ग धारणं गुरुकृपालेशत एव लभ्यम् । अर्थात् सद्गुरोः करुणां विना भुक्तिमुक्ति प्रदं शिवमतं अशक्यम् । दीक्षा, शिक्षा, ज्ञानमिति त्रिधा भिन्नस्य सद्गुरोः करुणाकटाक्षात् ज्ञानप्राप्तिर्भवतीति सम्यगुक्तं सिद्धान्त शिखामणौ–

कटाक्षचन्द्रमा यस्य ज्ञानसागर वर्धनः ।
संसार तिमिरच्छेदी स गुरुर्ज्ञानपारगः ॥

पादाब्जद्वितयं प्रभो च भवतः पातालतोऽधस्तनं
पाणीनां निवहःसदा प्रतिदिशं व्याप्तो विशिष्टः स्वयम्।
तद्वत्ते मुकुटं विभाति गगनादूर्ध्वं जगत्यद्भुतं
स त्वं मे प्रभुमल्लिकार्जुन करे बद्धो लघुत्वात्
स्वयम् ॥ १९ ॥

"स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम्" इत्युपनिषद्वाक्यानुसारेण सर्वत्र वसतो देवस्य विराड्रूपवर्णनं वचनेऽस्मिन् सम्यक् कृतम्। पुरुषसूक्तेऽपि भगवतोऽनन्तरूप वर्णनं दृश्यते-

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्"

अयमेवाशयः कालिदासेन स्वीये नाटके एकस्मिन् सूच्यते-

"वेदान्तेषु यमाहुरेक पुरुषं व्याप्यस्थितं रोदसी"

बसवेश्वरः स्वीये वचने शिवताण्डव वर्णनं करोति, यत्र शिवमहिम्नः स्तोत्रादिमं पद्यमुदाहरति येनेश्वरसर्वव्याप्त्यादिरूपः एव स्वभावो दरीदृश्यते-

महीपादाघाताद् व्रजति सहसा संशय पदं
पदं विष्णोर्भ्राम्यद् भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दोस्थ्यं यात्यनिभृत जटाताडित तटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥

भाले भस्म विभाति येन सततं भूमण्डले मण्डितं
पापं पर्वतसन्निभं परिहृतं त्वद्दर्शनान्मामकम् ।
मन्त्रं शम्भुमनोहरं यदि भवेत् आर्तिः कुतः प्राणिनां
पञ्चास्यं प्रभुमल्लिकार्जुन ! कथं खादेच्छुनः
शावकः ॥ २० ॥

प्रमाणमत्र-

नमः शिवायेति मन्त्रं यः करोति त्रिपुण्ड्रकम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।।

यथा सिंहं मृगेन्द्रं शुनःशावकः भक्षितुं, भीषयितुं वा न शक्नोति तथा रुद्राक्षभस्म मन्त्ररक्षितो भक्तः कस्मादपि न बिभेति। अर्थात् पवित्रभस्मनो, शिवपंञ्चाक्षर (षडक्षर) मन्त्रस्य च महिमात्र सुष्ठु सूच्यते। भस्मस्नानगरिमा सिद्धान्तशिखामणौ सम्यक् निरूपिता-

भस्मस्नानरताः सर्वे शिवभक्तिपरायणाः ।
निर्मुक्तदोषकलिताः नित्यशुद्धाभवन्ति हि ।।

तत्रैव शिवमन्त्रमहिमापि गीयते-

सप्तकोटिषु मन्त्रेषु मन्त्रः पञ्चाक्षरो महान् ।
ब्रम्हविष्ण्वादि देवेषु यथा शम्भुर्महत्तमः ।।

दण्डाग्रेच नटन् लुठन् भुवि यथा लोलः सदा वानरः
तन्त्रीयन्त्रितपुत्रिकेव भवताज्ञप्ता च वर्तेऽवशा।
यद् वा वारयसि त्वमेव तदहं नित्यं ब्रुवे सादरं
यावत्ते प्रभुमल्लिकार्जुन ! भवेत्तुष्टि-र्जगत्
प्रेरक ॥ २१ ॥

जगत् प्रेरकः शिवो यथाज्ञापयति सर्वेऽपि मानवास्तथैव वर्तन्ते। उक्तं च गीतायाम्–

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥

सिद्धान्तशिखामणावप्ययमेवाशयः सूचितः–

"मायी महेश्वरस्तेषां प्रेरको हृदि संस्थितः।"

भगवतः प्रेरणया एव सर्वं जगत् प्रवर्तते इत्यत्रोदाहरणद्वयं द्रष्टव्यम्– ननु दण्डाग्रे लुठन् नटन् वानरः तन्त्रीयन्त्रनियन्त्रित पुत्तलिका च। यद्यत्कर्मकरोमि तत्सर्वं भवत् प्रेरणया इति सर्वार्पणबुद्धिरत्र दरीदृश्यते॥

यावत्प्रेम भवेत् दृढं क्षितितले जात्यादिचिन्ता कुतः ?
तेषामार्द्ररतिप्रसक्तमनसां लज्जाभिमानौ कुतः ।
यावन्मे प्रभुमल्लिकार्जुन भवद्रागप्रमोदं मनः
जाने लौकिकगौरवं न सततं मोदेन्यमुकता पुनः ॥ २२ ॥

प्रेम्णः दृढस्थितौ जात्यादि चिन्ता यथा निरर्थका तथैव भगवत् प्रेममग्नानां नराणां मानाभिमानो न वर्तेते ॥

उक्तं चात्र कबीरदासेन–

पेयस्त्वया प्रेमरसो विशिष्टः
मानेऽपिते रक्षणबुद्धिरेषा ।
खड्गद्वयं कोशगतं कथं स्यात्
नैतच्छ्रुतं दृष्टमिदं कदापि ।

भगवत् प्रेमरस निर्भरा मीराबाई अपि स्वीयामवस्थां मीरलहर्या इत्थं वर्णयति–

माता मे जनकश्च बान्धवजनाः सर्वेपि दूरीकृताः
नान्यः कोपि भुविप्रियो गिरिधरः त्वामन्तरेणास्ति मे ।
संसारं व्यवधूय वीतविनया त्वामेव चिन्वत्यहं
दिष्टा दर्शन मद्भुतं तव विभो प्राप्तास्मि बाष्पाकुला ॥

चिन्ता मे शिवलिङ्गपूजनविधौ चिन्ता सुभक्तागमे
आह्यानमिपि भक्ति पूतमनसां चिन्ता च मन्मानसे।
चिन्ता श्री प्रभुमल्लिकार्जुन कृपालाभे सदा दुर्लभे
इत्थं मे हृदयं यदाकुलतरं चिन्ता नराणां कुतः ॥ २३ ॥

शिवध्यानादि चिन्तामग्नस्य शरणस्थलावस्थात्र वर्णिता। अङ्ग नामभोक्तरि मनुष्ये संसारानित्यताबुद्धिर्यदोत्पद्यते, तदा नरादीनां चिन्ता न बाधते। उक्तं चात्र सिद्धान्तशिखामणौ

विवेकिनो विरक्तस्य विषयेष्वात्मरागिणः।
संसार दुःख विच्छेदहेतोः बुद्धिः प्रवर्तते ॥
नित्यानित्यविवेकिनः सुकृतिनः शुद्धाशयस्यात्मनो
ब्रम्होपेन्द्र महेन्द्र मुख्यविभवेष्वस्थायितां पश्यतः।
नित्यानन्द परे निराकृत जगत्संसार दुःखोदये
साम्बे चन्द्रशिरोमणौ समुदयेद्भक्तिर्भवध्वंसिनी ॥
संसारार्तियुते नरे न भवति श्री शम्भुभक्तिः शुभा।

अत एव जगता सम्बन्धस्त्याज्य इति कबीरदासाभितम्। उक्तंचतेन

जगता यदि सम्बन्धः सुभक्तिर्नैव जायते।
तत्त्यक्तवा हरौ संगं यः करोति स भक्तिमान् ॥

शरणः शिवस्मरणादिचिन्तामयो भवतीति बसवेश्वरेणाल-ङ्कारिकरीत्या सूक्तम्–

चिन्ताकुलो भवति चन्द्रकृते चकोरः
अम्भोजिनीच सततं रविकातरासौ ।
चिन्तामयः कुसुमरागकृतेऽलिवर्गः
श्रीसंगमेश्वर स्मरणेऽस्मि तवाभिलाषी ॥

— × —

ग्रावाधर्षणजन्यपावककृतस्तापोऽज्ञसंगः क्षितौ
सद्भिर्यन्मिलनं पयस्वमथनात् प्राप्तं घृतं संस्कृतम् ।
संगः श्री प्रभुमल्लिकार्जुन ! भवद्भक्तैः समं संमतः
कर्पूराचलपावकौ च मिलितौ यातौ लयं तौ
क्षणात् ॥ २४ ॥

शरणैः सहैव वार्तालापादिकं कर्तव्यमिति सुष्ठु भणितमत्र। अज्ञसमागमस्तापकरो भवतीति स्वयं वेद्यम्। सज्जनैः सह वासः कियन्मनोहर इत्यत्र कबीरदासोक्तिरियं श्रूयताम्-

संगः सतां भवति गन्धवती समीपे
वासो यथा सुरभिचित्तहरः पृथिव्याम्।
गन्धं न यच्छति जनाय यदप्ययं स्वं
सामीप्यतः सुरभियुक्त इति प्रसिद्धम् ॥

सर्वज्ञोपि कन्नडभाषाकविरेवं ब्रवीति-

"सज्जनैः सह संलापो मधुपानसमोभवेत्"
सद्भिः संङ्गः सुदुर्लभ इति भवभूतिना प्रोक्तम्
"सतां सङ्गः सद्भिः कथमपिहि पुण्येन भवति।"

मीरापि साधुभिः सह दूरागतैः भगवद्वार्तां कुर्वन्ती वर्तत इति मीरालहर्यामुक्तम्-

तामेव परिवव्रुरर्चन विधौ दूरागताः साधवः।
सूची लोहमणिर्यथा सुजनता सौजन्यमाकर्षति ॥

ये चाङ्गादि विकारवृन्दरहिता लिङ्गैकनिष्ठापराः
ये वा कामतमःप्रमादरहिता भक्त्यासवः साधवः ।
ये चान्तःकरणत्रयेऽप्यकलुषा त्वद्भक्तिपूता नराः
तानेव प्रभुमल्लिकार्जुन ! सदा मह्यं मुदा
दर्शय ॥ २५ ॥

पूतात्मनां साधूनां अर्थात् शरणानां दर्शनार्थं कातरा महादेवी शरणानामिह लक्षणानि एकैकशो निरूपयति–

(1) अङ्विकार रहिताः (2) लिङ्गंकनिष्ठा पराः

(3) कामादितमः प्रभावरहिताः (4) भक्तिप्राणाः

(5) अन्तःकरणत्रयेपि निर्मलाः ।

सिद्धान्तशिखामणौ माहेश्वराणां लक्षणान्युल्लिखितानि तान्येवात्र दृष्टुं शक्यन्ते ।

परस्त्रीसङ्ग निर्मुक्तः परद्रव्यपराङ्मुखः ।
शिवार्थं कार्यं संपन्नः शिवागमपरायणः ॥
शिवैकनिष्ठः सर्वात्मा वीरमाहेश्वरो भवेत् ॥

एतान्येव लक्षणानि गीतोक्त स्थितप्रज्ञस्यापि भवितुं शक्यन्ते-यथा–

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

रत्नाढ्या यदिश्रृंखला भवति चेत् को वा तया बध्यते ?
मुक्ताजालरतिः कुतः ? कनकखड्गाघातवाञ्छाकुतः ? ।
यावल्लोकरति यदा भवति मे त्वद्भक्तिशून्यामतिः ।
आतंकः प्रभुमल्लिकार्जुन! भवेन्मृत्यूद्भवः

प्रेरकः ॥ २६ ॥

दुःखान्तो बन्धपीडान्तो भोगः संसारवासिनाम् ।
राजसोऽयं क्षितौ ख्यातस्त्याज्यो मोक्षपरायणैः ।।

त्रिविधसुखस्वरूपनिरूपणावसरे गीतायां राजससुखमुद्दिश्य यदुक्तं, तदत्रानुसन्धेयम्–

विषयेन्द्रिय संयोगात् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ।।

ऐहिक क्षणिकसुखविफलतां सिद्धान्तशिखामणिरपि खण्डयति–

ऐहिके क्षणिके सौख्ये पुत्रदारादि सम्भवे ।
क्षयित्वादियुते स्वर्गे कस्य वाञ्छा विवेकिनः ।।

जगता यदि सम्बन्धः ईश्वरभक्तिः असम्भव प्राया भवति ।
कबीरदासोऽत्र ब्रूते -

जगता यदि सम्बन्धः सुभक्तिर्नैव जायते ।
तत्त्यक्त्वा तु हरौसंगं यः करोति सभक्तिमान् ।

एतद्विषयप्रतिपादनार्थं उदाहरणत्रयं दीयते–

(1) रत्नाढ्या श्रृंखला (2) मुक्ताजालः
(3) कनकखड्गाघातंच ।

लिङ्गोद्भूतिरथेष्टालिङ्गभजनं येषां च लिंगैकता ।
आचारश्च शिवागमो भवति तद्वेदश्च संभाषणम् ।
वृक्षाद्बीजगणस्ततस्तरुवरास्ते बीजलीनाः पुनः
वन्द्यास्ते प्रभुमल्लिकार्जुन ! भवद्भक्ता
भवध्वंसिनः ॥ २७ ॥

प्रमाणं चात्र-

वृक्षाद् भवति बीजं हि तद्वृक्षे लीयते पुनः ।
रुद्रलोकं परित्यज्य शिवलोके भविष्यति ।।

वीरशैवमतस्वरूपसंक्षेपोऽत्रदीयते- जननीगर्भे लिङ्गदीक्षाविधिसम्पन्नः वीरशैवः लिङ्गोद्भव इति यथार्थं कथ्यते। जीविते लिङ्गैकनिष्ठा, लिङ्पूजनं भवतीति सुविदितमेव। बीजवृक्षन्यायेनेदं स्पष्टीक्रियते। आगमप्रमाणश्लोक एकोऽपि महादेव्योदाहृतः।

यद्गीतश्रवणं सुभाषितमतो यत्खेलनं संमतं
त्वद्भक्तैःसह नित्यमेवसुखदं मुक्तिप्रदं मङ्गलम्।
यावज्जीवनमस्तिभूमिवलये त्वत्प्रेरितं मामकं
तावत् श्री प्रभु मल्लिकार्जुन ! सुखं विन्दे
सतां संङ्गमे ॥ २८ ॥

यावज्जीवं शिवशरण समागमे वासः क्रियतामिति शिवाचारः।
"Man is Known by the company he keeps"
इत्यांग्लसुभाषितानुसारं सदैव साधुभिः सहैव वासः क्रियताम्।
उक्तं मयाचान्यत्र–

सदाचारयुतो भक्त इति वक्तुंच शक्यते।
आचारहीन संसर्गः विनाशायेति सूच्यते॥

शिवभक्तपूजादिकं सदैव कर्तव्यमिति सिद्धान्तशिखामणौ सुष्टूक्तम्–

पूजनात् शिवभक्तस्य पुण्या गतिरवाप्यते।
अवमानान्महाघोरो नरको नात्र संशयः॥

पीडा या शरणस्य कापि भुवने सा त्वां परं पीडयेत्
मातुर्वेदनया यथा शिशुरतो गर्भस्थितो बाध्यते ।
तस्मिन् मोदमये सदा पुनरहो तुष्टं जगन्मोदते
भक्तानां प्रभुमल्लिकार्जुन ! भवान् वश्योऽवशः
स्त्वतः ॥ २९ ॥

'पाण्डवानामहं वश्यः, इति कृष्णोक्तयनुसारं शिवो भक्तानामधीनः परवशो वर्तते । यद्यद् भक्तोऽनुभवति तत्तदखिलं शिवोऽप्यनुभवति । मातुर्वेदना गर्भस्थं शिशुं यथा बाधते, तथैव शिवभक्तानां पीडा शिवं बाधत इत्यत्र सदेहलवोपि नास्ति । यदा भक्तः सुखी भवति तदा शिवोऽपि तुष्टो भवतीत्यत्र सिद्धान्त शिखामणिवचनं प्रमाणम्-

शिवयोगिनि संतृप्तो तृप्तो भवति शंकरः ।
तत्तृप्त्या तन्मयं विश्वं तृप्तिमेति चराचरम् ॥

श्रान्ताहं भवबन्धनेन भवतो मायाऽप्यलंघ्या मया
भूत्वा भोगपरायणा पुनरहं क्षुत्पीडिता ताडिता।
यावत्त्वं सदयो मदीयविषये कारुण्यपीयूषतः
सन्तुष्टा प्रभु मल्लिकार्जुन ! भवन्मायावशोऽहं
कुतः ॥ ३० ॥

'मम माया दुरत्यया' इति गीतायां यदुक्तं तदत्रानुसन्धेयम्। अस्य प्रपञ्चस्य निर्माणे अविद्यासम्बन्धः इति यदुक्तं सिद्धान्तशिखामणौ तदवधारणीयम्–

अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः।
देवतिर्यङ्मनुष्यादि जाति भेदे व्यवस्थितः।
मायी महेश्वरस्तेषां प्रेरको हृदिसंस्थितः॥

भगवतोऽलंघ्यां मायां दूरीकर्तुं शिवानुग्रहोऽवश्यं प्राप्तव्यः। तदर्थेच शिवपूजादि कैकंर्यमनिवार्यम्। उक्तं मल्हणस्तोत्रे–

ये त्वां मरीचिचय चामर चारुचन्द्र
चूडामणे ! श्रुतिवचोभिरिहार्चयन्ति।
माया प्रपञ्च रचनानिचयं विलंघ्य
गच्छन्ति ते शिवपुरं रुचिरैर्विमानैः॥

भगवदर्पण बुध्या कर्मयोगरता एव भगवदनुग्रहेण मायां तरन्तीति गीतोक्तं समीचीनम्–

'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।'

लिङ्गार्थं परिधानभोजनकृतिः लिंगार्थमेवेक्षणम्
बाह्यान्तः करणादिकं च सततं लिंगार्थमस्मद्धनम् ।
निष्कामात् कृतकृत्यमेव सकलं नैष्कर्म्यसिद्धिप्रदम्
संयुक्ता प्रभुमल्लिकार्जुन! भवद्भक्तैः समं च
त्वया ॥ ३१ ॥

यद्यत्कर्म क्रियते तदखिलं शिवभावनया यदिक्रियते तदा सर्वमेव शम्भुपूजनं भवतीति शंकराचार्येण शिवमानसपूजायां सुष्ठु भणितम्–

"यद्यत्कर्म करोमि तत्तदखिलं शम्भोतवाराधनम् ।"

अर्थात् शिवार्पण बुध्या क्रियमाणं कर्म न बन्धनकरमिति यदुक्तं तत्कर्मयोगस्वरूपं स्मारयति । गीतायामुक्तं यथा–

त्यत्कत्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोपि नैवकिंचित् करोति सः ।

क्रीडासर्पगणेन सार्धमनिशं सन्तोषसंवर्धिका ।
दन्तानामपकर्षणेनच्च यथा कायेन संगः सुखम् ।
तद्दोषोपरमो भवेद्यदि पुनः कायः सदोषोऽसुरः ।
यैः प्रीतः प्रभुमल्लिकार्जुन! भवान् मुक्ताः
सकाया नराः ॥ ३२ ॥

क्षययुक्तोऽप्ययं देह एव मुक्तिसाधनमिति यदुक्तं तदतीव समंजसम् । उक्तं कालिदासेन कुमारसम्भवे–

"शरीरमाद्यंखलु धर्म साधनम् ।
भोगरोग प्रदो देहः शिवपूजारतो भवेत् ।
मोक्षलक्ष्मी समापन्न स्तदा भवति मानवः ।।

सर्पः स्वीयविषदन्तेन भयंकरो भवति येन सर्वेऽपि मानवाः भीता भवन्ति । विषदन्तनिर्मूलने सर्पः साधुर्भवति चेत् तदा क्रीडाजीव मनोहरा भवति । अनयैव सरण्या कायोऽपि शिव-पूजादि निरतो मोक्षप्रदो भवतीति वक्तुं शक्यते । देहमेव देवालयं मन्यमानो बसवेश्वरः आॅगम प्रमाणेमेकमुदाहरति–

देहो देवालयः प्रोक्तः जीवो देवः सदाशिवः ।
त्यजेदज्ञाननिर्मार्ल्यं सोऽहं भावेन पूजयन् ।।

यः शम्भुं विगणय्य सोऽपिसमादो भस्मावशिष्टो यमः
तं घोरे तपसिस्थितं मनसिजो विक्षोभयन् शंकरम् ।
एतच्छासनलंघनात् स्वशिसरच्छेदं विधाताप्तवान्
विस्मृत्य प्रभुमल्लिकार्जुन! नरस्त्वां दुर्गतिं
प्राप्नुयात् ॥ ३३ ॥

शिवविस्मरणमनर्थकरमित्यत्र पुराणादिषु नेके प्रसंगाः वर्णिताः शम्भुविस्मरणान्नरो यथा दुर्गतिं गच्छति, उदाहरणत्रयेण स्पष्टी क्रियते- (1) समदो यमः शिवावमाननाद् भस्मावशेषः कृतः। (2) घोरे तपसि वर्तमानं शिवं पुष्पबाणो विक्षोभयन् कामोपि भस्मावशेषः कृतः ।

उक्तंचात्र कालिदासेन कुमारसंभवे-

क्रोधं प्रभो संहर संहरेति
यावद् गिरःखे मरुतां चरन्ति ।
तावद्ध ताशो हरनेत्र जन्मा
भस्मावशेषं मदनं चकार ।।

शिवशासनलंघनात् ब्रम्हापि प्रजापतिरेकस्वशिरच्छेदं प्राप्तवान् । हरकृतं यमशासनं मल्हणस्तोत्रे इत्थं वर्णितम्-

गर्जत् प्रचण्ड घन घर्घर मेघ संघ
संघट्ट घोष घनघोर रवेण कोऽन्यः।
श्वेतं नयन्तमतिघोर कशान्तकालं
भस्मावशेषमकरोद्धरहुं कृतेन ।।

मातापितृविहीनतेति भुवि मे मां पीडयस्यद्यचेत्
नाहं भीतिमुपैमि नाथ तरुपत्रैर्जीवितं धारये ।
तन्मे स्थूलशिलातलेऽपि शयनं पीडाकरस्त्वं पुनः
प्राणास्ते प्रभुमल्लिकार्जुन ! मया त्यक्ताः
सुखं नाशिनः ॥ ३४ ॥

तापत्रयप्रदानेन परीक्षा क्रियते सताम् ।
शिवेन भुवि प्रख्यातभक्तानां दृढचेतसाम् ॥

यद्यत् प्राप्यते भक्तैः शिवानुग्रह कारणम् ।
प्रसादबुद्ध्या स्वीकृत्य तरन्ति भवसागरम् ॥

त्रिषष्टि शिवभक्तानां चरितेषु पुनः पुनः ।
परीक्षानिष्ठुरः शम्भुः वर्णितो भक्तवत्सलः ॥

भक्तमौलिर्महादेवो पितृहीनाबलापि सा ।
पीडिता प्राणनाथेन प्राणान्त्यक्तुं सदोत्सुका ॥

तापत्रय प्रदानेन शम्भुप्रीतिर्निरूप्यते ।
विना तापं सुखं योऽस्ति भदबन्धन पीडितः ॥

तापेनैव जगद्भ्रान्तिर्बन्धु प्रीतिर्विमोहिनी ।
नाशमेति शिवैक्यं तत् प्राप्नुवन्ति शिवादृताः ॥

न त्वं मद्वचनं श्रुणोषि यदपि त्वद्गानरक्तानिशं
मां वा यद्यपि वीक्षसे न सुतरां त्वद्दर्शनोत्कंटिता।
नाहंते रुचये यदप्यनुदिनं पूजादिमग्ना सती
सानन्दं प्रभुमल्लिकार्जुन ! भवच्छृंगार-
भावन्विता ॥ ३५ ॥

लिङ्ग पतिः सती चाहमिति वुद्ध्याराधनं शिवस्य कुर्वतो भक्तस्यावस्थात्र वर्णिता–

एक एव भवेद् भर्ता सच्चिदानन्द लक्षणः।
असंख्य शिवभक्तास्ते भार्यारूपेण भूतले ॥

सत्येवं परमात्मा भक्तोपेक्षां कुर्वन्निव भाति तथापि भक्तः शिवोपेक्षां कर्तुं नं शक्नोति। लिङ्गाङ्गसामरस्यमेव यस्य परमं पदं तच्छिवमते भक्तपातिव्रत्यं प्रशंस्यते। अनेनव विधिना कबीरदासोऽपि ब्रवीति–

न विस्मर त्वं जगदीश्वरेमं
जनं जनैर्नित्यमुपास्यमान।
असख्यभक्ता ननु मादृशास्ते
न कोऽपि मे त्वत्सदृशोऽस्ति दानी ॥

प्रच्छन्नस्तनमण्डलादिरुचिरा तारुण्यपूर्णेति मां
औत्सुक्यादनुगन्तुमद्य सकलाः यूयं प्रवृत्ताः कुतः ?
नाहं लौकिक मानिनी न गणिकारूपोपजीवाक्षितौ
त्यक्त्वा त्वां प्रभुमल्लिकार्जुन ! नृणामास्यं न
पश्याम्यहो ॥ ३६ ॥

शिव एव यदा भर्ता, मर्त्ये भर्तृपदं कुतः ?
सोदरा सकला भक्ता इतरे जन्तवः क्षितौ ॥

भर्तारमितरं यावत् वाञ्छन्ति भुवने नरम् ।
गणिकावन्निन्दिता लोके नरकं तैरुपभुज्यते ॥

शिवमेव प्रपन्नायाः महादेव्याः जगत्पतिम् ।
पातिव्रत्यपराकाष्ठा प्रकटीक्रियतेऽधुना ॥

मीराप्येवमेव ब्रूते:-

बाल्यादेव मया व्रतो यदुपतिः प्राणेश्वरः शाश्वतः नान्यः कोऽपि पतिर्ममास्ति भुवने तत्क्षम्यतामार्यभो ।

(मीरा लहरी)

सन्यासः भवतोऽस्ति चार्थविषये किंचिन्न वा कामयेत्
सन्यासः रसनेन्द्रिये भवति चेत् त्याज्या रुचिलां किको ।
सन्यासः विषये स्त्रियो यदि भवेत् तत्संगमेच्छाकुतः ?
देहे न प्रभुमल्लिकार्जुन ! पुनस्चित्ते विवस्त्रो
भवेत् ॥ ३७ ॥

अर्थप्राणादिविषये यदि सन्यासो भवति तदा लौकिकसुखादि कमुपेक्ष्यं स्यात् । सर्वसङ्गपरित्यागिनी महादेवी न केवलं चित्ते, देहेऽपि भौतिके विवस्त्रासीत् ।

यावल्लौकिक चिन्तनं न नश्यति, तावत् शिवस्मृतिः व्यर्था भवति। सर्वमपि शिवार्पण बुद्धया शिवप्रसाद बुद्धयाच भुञ्जानो भक्तः मुक्तः एव वर्तते। पठन् श्रुण्वन् लिखन् वापि यदि जगता न विरज्यते, किमर्थं तस्य सन्यासः मिथ्याचारः स कथ्यते ।। कबीरदासोऽप्यत्र कथयति–

शास्त्राणां पठनं भूयः केवलं न कृतं मया ।
मननंचापि तत्तेषां तथापि मनसो भ्रमः ।।

(कबीरदास शतकम् ।)

क्षुत्क्षामा विपिने मुहुस्तरुलताः याचेऽङ्गतृप्त्याशया ।
सर्वाः दानरता स्वलिङ्परमप्रीत्यर्थमत्यादरात् ।
दीनैवं भुवने भवीति गणिता भक्ता स्वयंते स्मृता
नो दैन्यं प्रभुमल्लिकार्जुन !

भवेदद्यप्रभृत्यैहिकम् ॥ ३८ ॥

यद्यपि विरक्तो जनः स्वोदरपूरणार्थमन्यं नयाचते, तथापि कानने तरुलताः याचेत। याचमानो नरो भूय भवबन्धनयन्त्रितः।

दधानास्ताः लता लोके शरणा जनबन्दिताः ।
यदृच्छालाभसंतुष्टो यतात्मा मुनिपुङ्गवः ।
गीतायां शंस्यते भूयो जीवन्मुक्त इति स्मृतः ॥

वीरमाहेश्वरलक्षणं सिद्धान्तशिखामणिनिरूपितमिदमेवानुवदति-

शब्दस्पर्शादिसंपन्ने सुखलेशे तु निःस्पृहः।
शिवानन्दे समुत्कण्ठो वीरमाहेश्वरो भवेत् ॥

भीरोरस्ति कुतः सुखं स कुरुते कार्यंच यत्किचन
शूरस्याभयमस्ति भूमिवलयेशान्तस्य बाधा कुतः ?
यो वा त्वत्करुणैकभाजनतया स्त्रीद्रव्ययोर्निःस्पृहः
तस्यास्ति प्रभुमल्लिकार्जुन ! पुनर्जन्मादिभीतिः
कुतः ? ॥ ३९ ॥

जगद्भ्रान्तिविहीनस्य मोहक्लेशविमानिनः ।
शान्तस्य शिवभक्तस्य पुनर्जन्म भवेत्कथम् ॥
न भीरोः सुखलेशोऽस्ति शूरस्य भयमस्ति किम् ?
शान्तस्य मनसो बाधा, विरक्तस्य रतिः कुतः ?

लिङ्गनिष्ठादियुक्तस्तु भक्तो रुद्र इति सम्यम् वर्णितं सिद्धान्तशिखामणौ–

लिङ्गे यस्य मनो लीनं लिङ्गस्तुतिपराच वाक् ।
लिङ्गार्चनपरौ हस्तौ स रुद्रो नात्र संशयः॥

छाया नास्ति यदा पुनः क्षितितले किं पादपैः केवलम् ?
किं द्रव्येण फलं दयाविरहिणो धेन्वा पयोवर्जनात् ।
रूपेणाप्रतिमेन किं यदि भवेन्नासौ नरः सद्गुणी
त्वज्ज्ञानं प्रभुमल्लिकार्जुन ! भवच्छून्यं मया किं
फलम् ॥ ४० ॥

ईश्वरज्ञानविमुखो लौकिकज्ञानवान् नरः ।
मूढधीरिति विख्यातः भवबन्धनयन्त्रितः ।।

छायारहितैः वृक्षैः, दयाविमुखस्य धनेन, पयोवर्जितया गावा किं फलम् ? गुणविहीनस्य नरस्याप्रतिमेन रूपेणापि किं प्रयोजनम् ? एवमेव शिवज्ञान शून्यस्य मानवस्य जन्मनापि किम् ? विवेकिनः देहेऽस्मिन् क्षणिके मोदो नास्ति । उक्तंच सिद्धान्तशिखामणौ–

मलकोशे शरीरेऽस्मिन् महादुःखविवर्धने ।
तडिदंकुश संकारो को वा मोदेत पण्डितः ।।

अन्धोलूकगणो दिवा दिनमणेर्निन्दाकरो भीकरः
काणः काकगणोऽपि निन्दति निशाकान्तं तथा मानवः।
काणो दर्पणनिन्दको भवति सन् संसारघोरार्णवे
मग्नस्य प्रभुमल्लिकार्जुन ! भवद्भक्त्या विना
बन्धनम् ॥ ४१ ॥

अनेकजन्मार्जितपूर्वपुण्यविशेषाल्लभ्यते शिवभक्तिः। तया विहीनस्य नरस्य न केवलं व्यर्थं जीवनं किन्तु भवबन्धनं घोरतरं भवति। उक्तं सिद्धान्तशिखामणौ-

शुद्धान्तः करणे जीवे शुद्धकर्मविपाकतः।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी ॥

अन्यत्र मयैवोक्तं-

शिवानुरागराहित्ये भक्तिराडम्बरान्विता।
पुनर्जन्मशतानां सा कारणं परमं भवेत् ॥

आत्मनोऽपराधवशात्संसारबद्धस्य जीविनोऽवस्थात्रोदाहरण-त्रयद्वारा स्फुटीकृता-

1) अन्धोलूकगणो दिवाकरं निन्दति।

2) काणः काकगणो निशाकरं गर्हति।

3) काणो मानवो दर्पणनिन्दको भवति।

छिन्नः सव्यथ एव चन्दनतरुर्गन्धं स्वकं किं त्यजेत् ?
तप्तं हेम किमु प्रभावरहितं, संपीडितेक्षुः पुनः।
माधुर्यं त्यजते स्वकं किमु ? भवद्दण्डं सहे निर्भयं
किं वा मे प्रभुमल्लिकार्जुन ! भवद् भक्त्या
वियोगो भवेत् ॥ ४२ ॥

यद्यपि भक्तः ईश्वरेण परीक्षासमये पीड्यते, तथापि शिव भक्तिहीनो भवितुं नार्हति। निघर्षणादिभिश्चतुर्भिः हेम यथा परीक्ष्यते, तथा शीलादिभिर्मानवोऽपि परीक्ष्यः। परीक्षया तया विना भविनो भक्तस्य भेदः कथं ज्ञायते ? नीरक्षीर विवेकपरीक्षया विना बकमरालयोर्भेदः कथं वा ज्ञायते ? काक-पिकयोर्वर्णसाम्येऽपि वसन्तागमस्तयोर्भेददर्शने समर्थो भवति। भक्तित्यागविमुखता शिवभक्तानामुदाहरणत्रयसहाय्येन प्रकटी क्रियते–

1) छिन्नोऽपि चन्दनवृक्षः स्वीय गन्धं न त्यजति।
2) तप्तमपि हेम स्वीय प्रभां न दूरीकरोति।
3) संपीडितोऽपीक्षुः माधुर्यं न मुञ्चति।

कैवर्तो जलवासिनः कतिपयान् हत्वा सुखं मोदते
स्वीये वेश्मनि दारको यदि मृतो दुःखं परं विन्दते।
तस्येदं भुवि हास्यकारणमहो दुःखं दुराचारिणः
चाण्डालः प्रभुमल्लिकार्जुन ! भवद्भक्तोऽपि
हिंसारुचिः ॥ ४३ ॥

प्रमाणं चात्र–

स्वात्मानमितरं चेति भिन्नता नैव दृश्यताम्।
सर्वं जिजज्योतिरेवेति यः पश्यति स पश्यति ॥

आत्मवत्सर्वभूतानि यः पश्यति स एव सज्जन इति न्यायेन शिवभक्तोऽपि यदि हिंसारुचिर्भवेत्, तदा चाण्डाल इति गण्यते। अयमाशय उदाहरणेनैकेन स्फुटीक्रियते– धीवरो जलवासिनः कतिपयान् प्राणिनः वराकोदरपूरणार्थं घातयति सुखं च लभते। किन्तु स्वीये गृहे यदात्मीयबालको म्रियते तदातुलं शोकमुपैति। एतद्भुवने हास्यकारणं भवेदेव। या क्रियास्मान् बाधते, सान्यान् प्रति न कर्तव्या। अयमेव सदाचारः कायवाङ्मनोगता त्रिविधा हिंसा न कर्तव्येति पातञ्जल योगसूत्रेऽपि वर्णिता। अहिंसापर-नामधेयकारुण्यसंपत्तिर्धर्मसंग्रहे निरूप्यते। सिद्धान्तशिखामणिरत्र प्रमाणम्–

शमो दमो विवेकश्च वैराग्यं पूर्णभावना।
क्षान्ति कारुण्य संपत्तिः श्रद्धा सत्यसमुद्भवा ॥

त्वज्ज्ञानेन समं रसातलमिदं मुक्तिस्थलं पावनं
त्वज्ज्ञानेन विना भवेद्यदि पुनर्मोक्षोऽपि सा दुर्गतिः।
त्वत्तुष्टिर्यदि वेदनापि सुखदा सौख्यंच पीडान्यथा
बन्धोऽपि प्रभुमल्लिकार्जुन ! भवेन्निर्बन्धनं
त्वत्कृतम् ॥ ४४ ॥

शिवभक्तिविहीनस्य कुत्रापि स्वास्थ्यं न विद्यते। शिवभक्तिः पूर्णस्य नरस्य पातालमपि मुक्तिस्थलं भवति। भक्तिविहीनस्य मोक्षोऽपि दुर्गतिर्भवति। येन शंकरः प्रीतस्तस्य वेदनापि सुखं भवति। बन्धनमपि मुक्तिवदानन्दकरं भवति। शिवभक्तो यत्रापि तिष्ठति, तत्स्थलं कैलास इव पावनं भवति इत्यत्र बसवेश्वरेणैकं प्रमाणवचनमुदाहृतम्–

चाण्डालवाटिकायां वा शिवभक्तः स्थितो यदि।
तच्छ्रेणी शिवलोकस्य तद्गृहं शिवमन्दिरम्॥

किं भीतेन फलं वनेचरगणात्सानुस्थिते मन्दिरे
वीच्यादेश्च समुद्रमन्दिरतया शब्दान्नराणां पुरे।
संसाराध्वनि तिष्ठतो यदि भवेन्निन्दा स्तुतिर्वा नवा
कोपादीन् प्रभुमल्लिकार्जुन ! सुखीभूयात् त्याजन्
मानवः ॥ ४५ ॥

संसारे वर्तमानस्य मानवस्यावस्थात्र वर्ण्यते। लोकेऽस्मिन् जीवतो मानवस्य स्तुतिर्निन्दा वाऽनिवार्या। सर्वानपि प्राणिनस्तोषयितुं केनापि न शक्यते। आत्मनोऽविवेकवशाद् दुःखं प्राप्तो नरः परमात्मानमपि निन्दति। अतो लोककृतस्तुतिनिन्दामयीं क्रियां प्रति प्रतिक्रिया न कार्या। अयमाशयः उदाहरणत्रयद्वारा निरूपितः–

1) पर्वताग्रे वर्तमानस्य वनेचरगणाद् भीतिर्न भवतु।

2) समुद्रतीरवासिना वीच्यादिभ्यो भीतिर्न कर्तव्या।

3) पत्तने वर्तमानेन नरेण शब्देभ्यो भयं न कार्यम्।

लाभालाभादि द्वन्द्वैरपि यन्मनो न विचाल्यते तस्य स्थितप्रज्ञस्य चित्तप्रसादवर्णनं गीतोक्तमेतदेव विशदयति। प्रसादे सर्वदुःखानां हानिरस्योपजायते।

यद्वा भावि परेद्युरद्य मम तद् भूयाद् भयं नास्ति मे
यद्भाव्यं जगतीतलेऽद्य च भवेद् भूयः सपद्येव तत् ।
अद्यैवास्तु परेद्युरस्तु मम तद् व्यर्थं हि तच्चिन्तनं
यावत्ते प्रभुमल्लिकार्जुनकृपा
निश्चिन्तचित्तास्म्यहम् ॥ ४६ ॥

"अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।" इति न्यायेन यद्यद् भावि तत्तद् भवतु मे इति धीरतया भणितमत्र । यावत्परमात्मनोऽनुग्रहोऽस्ति तावत् कस्मादपि भीतिर्न भवतु । सर्वमपि सोढुं शिवभक्तानां शक्तिवर्तते । यस्याऽपि भगवतः प्रीतिर्भवति, तं कोऽपि घातयितुं न शक्नोतीति विषये कबीरदासोक्तिरियं स्मर्तव्याः-

न तं जनः कोऽपि हिनस्ति लोके
करोति रक्षां प्रभुरेव यस्य ।
जगद् भवेद्यद्यपि तस्य शत्रुः
विनाशमायाति न तस्य किंचित् ॥

भुक्तं वृक्षफलं यदा, तरुगणावस्थांशुचा किं फलम् ?
त्यक्ता सा यदि कामिनी क्षितितले यो वास्तु को वा तया।
त्याज्या मृद्यदि किं फलंच भुवने विस्तीर्णभूम्या तया ?
यावन्मे प्रभुमल्लिकार्जुन ! भवान्ज्ञातः शरीरेण
किम् ॥ ४७ ॥

शरीरमाद्यं खलु धर्मसाधनमिति कालिदाससुभाषितानुसारं साधनभूतेन शरीरेण यदेश्वरसाक्षात्कारः कृतस्तदा तेन किं प्रयोजनम् ? शिवज्ञानफलस्य शरीरस्य फलप्राप्तौ शरीरानस्था भवतीति व्यावहारिकं सत्यम्। एतदुदाहरणत्रयेण स्पष्टीक्रियते–

1) यदा फलानि भुक्तानि, वृक्षावस्थाचिन्तया किम् ?
हिन्दी भाषायां लोकोक्तिरेका भवति–
आम खाने से काम, पेड गिनने से क्या काम ?

2) त्यक्तायां नार्यां यः कोऽपि तया सार्धं वसतु।

3) मृदि त्यक्तायां भूम्या किं प्रयोजनम् ?

क्षुत्क्षामा यदि पत्तनादिषु पुनर्भिक्षान्नतुष्टा क्षितौ
पानेच्छा यदि दीर्घिकादिसुलभं प्राज्यं जलं निर्मलम् ।
शीतार्ता यदि जीर्णवस्त्रनिवहः स्वापोऽपि देवालये
सौख्यं मे प्रभुमल्लिकार्जुन ! भवत्संयोगजं
शाश्वतम् ॥ ४८ ॥

विरागिणः ऐहिके सुखे काप्यास्था न वर्तते। यदृच्छालाभ-संतुष्टस्य ज्ञानिनः स्थितप्रज्ञस्य वाऽवस्थात्र स्मर्तव्या। उक्तंच गीतायाम्:-

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौच कृत्वापि न निबध्यते ॥

सर्पोऽसौ मुरलीरवेण मुदितः क्ष्वेडान्वितो भीतिद
गीतादिश्रवणेन तेन मनुजे दोषाकरे किं पुनः ।
वागाडम्बरहीनता हृदि निजे ब्रह्मानुभूतिस्थितिः
येषां तान् प्रभुमल्लिकार्जुन ! सतः संदर्शय
ज्ञानिनः ॥ ४९ ॥

गीतादिश्रवणमुदितोऽपि सर्पः विषधरो भीकरः। तथैव मानवोऽपि दोषाकरस्त्याज्यः। उक्तं चात्र-

मणिना भूषितः सर्पः किमसौ न भयंकरः ?

कायादिकरणत्रयेऽपि शुद्धस्य शिवभक्तस्य विरलताप्यत्र वर्ण्यते। तेषां शिवशरणानां दर्शनार्थं महादेव्या कातरता निरूप्यते।

यावत्तत् परिपक्वतां न भजते तन्नीरसं वै फलं
कामोऽयं जित इत्यनन्तबलवान् दृश्या च मे नग्नता ।
मा भूद् बुद्धिविकारतेति भवतां कामेन्द्रियः गोपितः
सद्भक्ता ! प्रभुमल्लिकार्जुनरताः किं
बाधिता स्यामहम् ॥ ५० ॥

कौशिकदुराचरविरागिणी महादेवी स्वीयं वस्त्रमपि परित्यज्य दिगम्बरा भूत्वानुभवमण्डपमागता। तत्राल्लमप्रभुमुख्यैरसंख्यैः शिवशरणैः स्वकेशगुप्तं कामेन्द्रियं प्रति यदा पृष्टा तदा ब्रवीत्यसौ–

काममुद्रावलोकेन भवतां मास्तु पीडनम ।
इत्येव मयैवासौ गोपितो जननेद्रियः ॥

तस्याः वैराग्यपरमसीमा शिवशरणानामुपरि च वर्तमाना करुणात्र स्फुटो भवतः ।

शुष्कं वास्तु कलेवरं भवतु वा सामर्थ्यंपूर्णं स्वयं
भावो मे परिशुद्धतां व्रजति चेत् किं देहगत्या तया।
नाहं देहविधौ कदापि विमनाश्चिन्ताकुला व्याकुला
यावत्ते प्रभुमल्लिकार्जुन ! भवेत्प्रीतिस्ततः
संकुला ॥ ५१ ॥

यद्यपि शरीरमाद्यं धर्मसाधनम् तथापि देहपुष्टिकृते बराकोदर पूरणे वा दुष्कृतिर्न कार्या।

मनःशुद्धये एव शरीरशुद्धिरिति बसवेश्वरोऽपि स्वीये वचने निरूपयतिः–

वल्मीकताडनपरो विफलः प्रयत्नः
सर्पो मृतो न भवितोदरवास एव।
घोरात् तपश्चरणतः किमु चांतरंगे
श्री संगमेश ! मलिनो मनुजो यदि स्यात् ।।

कर्मेन्द्रियाणि संयम्य विषयसुखं मनसा स्मरन् मनुजो मिथ्याचार इति गीतायामुक्तम्–

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ।।

अत एवान्तरङ्गशुद्धिं विना शिरोमुण्डनादिबहिरङ्ग शुद्धिमता विडम्बना कबीरदासेन कृता–

शिरोमुण्डनमत्रेण हरिर्लभ्यो यदा नरैः।
भूयो मुण्डनमापन्नो मेषो वैकुण्ठमेति किम् ? ।।

दुग्धं वेश्मनि यावदस्ति मधुरं किं वा घृतार्थं श्रमः ?
लिङ्गे किं करसंस्थिते शिवमये तीर्थादिभिः किं फलम् ?
पादोदादि सुपावनो यदि नरः शास्त्रादिभिः किं फलम् ?
त्यक्त्वेष्टं जडलिङ् पूजनपरो भूयः शुनीगर्भभाक् ।
प्रमाणं शिवधर्मपुराणे-
इष्टलिङ्गमविश्वस्य तीर्थलिङ्गस्य पूजकः ।
श्वानयोनिशतं गत्वा चाण्डालगृहमाचरेत् ।।
लिङ्गे श्रीगुरुशोधिते परतरे तीर्थादयः पावनाः
विश्वस्येदमुदारधीरमनसा संपूजयेच्छाम्भवम् ।
लिङ्गे स्थावरमादरेण सततं यः पूजयेद् दुर्मतिः
घोरा श्री प्रभुमल्लिकार्जुन ! दशा शरकत्
पुनर्नारकी ॥ ५२ ॥

शिवांशभूतो जीवात्मा शिवेन सह सर्वदा ।
वसेदिति करे लिङ्गं गुरुणादीयते मुदा ।।
करस्थे शाम्भवे लिङ्गे तीर्थलिङ्गेन कि फलम् ?
गङ्गाजलं परित्यज्य कूपतोयरतिः कुतः ।

इष्टलिङ्पूजकोऽपि वीरशैवः स्थावरलिङ्गापायोपेक्षां न करोतिवति सिद्धान्तशिखामणिर्वदति-

यत्र स्थावरलिङ्गानामपायः परिवर्तते ।

अथवा शिवभक्तानां शिवलाञ्छनधारिणाम् ।।

तत्र प्राणान् विहायापि परिहारं समाचरेत् ।।

अत्रायमाशयः- बहुधन श्रमादिव्ययकरे स्थावरलिङ्गपूजाविधौ चित्तं न देयम् । सदैव सन्निहितस्येष्टलिङ्गस्य पूजा कर्तव्या ।

— × —

अन्तःस्थः पतिरस्ति शंकरमयं लिङ्गं सदा शाश्वतं
बाह्योयः पतिनामभाक् च मनुजो मूढो विटःस स्मृतः।
ताभ्यां तुष्टिमयो भवेत्कथमसौ साधारणः सङ्गमः
शक्यं किं प्रभुमल्लिकार्जुन ! नरेणाप्तुं द्वयं
सौख्ययोः ॥ ५३ ॥

पतिद्वयसमायुक्ता यथा नारी विगर्हिता।
भक्तो लिङ्गपति र्भूत्वा संसारे निरपेक्षकः॥

श्लोकेऽस्मिन् महादेवी स्वीयामवस्थां विशदयति पतिरन्तःस्थः प्राणादिलिङ्गरूपः शिवो वर्तते। यदि बाह्यमपि पतिमेकं लभे तदाहं कुलटा स्यां सोऽपि विटो भवेत्। अनयैव सरण्या मीरापि ब्रूते "बाल्यादेव गताहमम्ब शरणं श्रीकृष्णमेव ध्रुवम्।" अयमशयः-

लिङ्गेन सह दाम्पत्यं वीरशैवस्य निश्चितम्।
भोगमोक्षपदं यत्स्यादागमादिप्रमाणितम्॥

शीलज्ञानमिदं कुतो भवति तत् केषांचिदेव क्वचित्
कामाद्यामिषसीमिता च भविता सप्तप्रकारावरा।
सप्तैते भविनो भवन्ति मनुजस्याङ्गे यदा शाश्वतं
लिङ्गार्चां प्रभुमल्लिकार्जुन ! नरः कुर्वन्
भवेत् तस्करः ॥ ५४ ॥

कामादिभिररिभिः पीडितो मनुजो भवीति वक्तुं शक्यते। अतः लिङ्गधारी लिङ्गपूजकोऽपि नरः पंचाचारविशुद्धमनाः भूत्वा षट्स्थलाचरणे समर्थो भवतीति वीरशैवमार्गः।

त्वद्भक्तैः सहवासतस्तनुरियं शुद्धामदीया यतः
तेषां तीक्ष्णनिरीक्षणाद् भवति मे चित्तं विशुद्धं ततः।
पादोदादिसुखेन पावनतराः प्राणा इमे प्रत्यहं
त्वद्भक्तैः प्रभुमल्लिकार्जुन !
भवद्भूषा कृता तैरहम् ॥ ५५ ॥

शिवशरणैः सहैव वासः क्रियतामिति साधु कथितम्। यतस्तैः सह वसतो मानवस्य तनुशुद्धिर्भवति तत्कटाक्षपातान्मनःशुद्धिरपि भवति। तथैव तत्पादोदकादिलाभेन प्राणशुद्धिः सिद्ध्यति। उक्तं सिद्धान्तशिखामणौ–

शिवभक्तो महतेजाः शिवभक्तिपराङ्गमुखान्।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित्॥

कल्याणाभिधपत्तने न सुलभो नृणां प्रवेशः क्वचित्
ये वाशामिषकल्मषैर्न विरताः येषां न शुद्धं मनः।
वाक्कायादि निरन्तरं यदि भवेन्नाहं कृतिध्वंसनं
संप्रीतः प्रभुमल्लिकार्जुन ! भवान्
धन्यास्मि तद्दर्शनात् ॥ ५६ ॥

आध्यात्मिक केन्द्र भूते कल्याण नगरे यस्यापि कस्यापि प्रवेशो न सुलभः। येषामन्तरङ्गः कलुषितः येषां मन आशामिष पूर्णं, ते प्रवेशानर्हा इति स्वयंनेद्यम्। योगादिविभागप्रवेशार्थमपि यमादिनिरूपित नैतिक गुणावश्यकता, पातंजल योगसूत्रे विशदी कृता। 'अथातो ब्रह्मजिज्ञासा' इति ब्रह्मसूत्रे शमदमादि साधनसंपदावश्यकता सूचिता। अर्थात् भगवद्दर्शनार्थमन्तरङ्ग-शुद्धिरनिवार्या।

त्वद्भक्तेक्षणमेव नेत्रयुगलालङ्कारसंयोजनं
गीतं मे श्रवणप्रसाधनविधिः सत्यं वचो भूषणम्।
सत्पात्रैकविशिष्टदानमधुना हस्तद्वयालंकृतिः
इत्येतैः प्रभुमल्लिकार्जुन ! नरो हीनः
कथं स्यात्कृती ॥ ५७ ॥

शिवभक्तस्य शिवादन्यस्य कस्यापि चिन्ता न वर्तत इति वचनेऽस्मिन् सुष्टु सूचितम्। भक्तानामीक्षणमेव नयनालङ्कारणम्। शिवसंकीर्ति (गीत) श्रवणमेव श्रवणयोः भूषणम्। सत्पात्रदानमेव हस्तालंकृतिः। इत्थां सदाचारसंपन्नस्य एव शिवः प्रसीदति। बसवेश्वरोऽपि ब्रवीतिः-

भक्तो यदा नयनमार्गमुपैति शम्भो।
यो वन्दते सविनयं सनयः स भक्तः।
वाङ्माधुरी च करणं तपसो जपस्य
श्री संगमेश ! विनयात् त्वमसी प्रसन्नः॥

वित्तादित्रितयं चरादिरतये नित्यं समर्प्यामलं
इष्टादित्रिविधेऽपि लिङ्गनिलये चित्तं निधायाचलम्।
शुद्धादित्रितयप्रसादपरमप्रीता सुखाकांक्षिणी
हित्वा त्वा प्रभुमल्लिकार्जुन ! कुतो याम्यद्य
मोक्षार्थिनी ॥ ५८ ॥

वित्तादित्रयँ चरादिपूज्यत्रयाय चित्तं इष्टादिलिङ्गत्रयाय समर्प्य शुद्धादिप्रसादत्रितयं यो भुङ्कते स जीवन्मुक्तो भवति। एवंविधा परमा शिवभक्तिः पंचम पुरुषार्थरूपेण स्तूयते मायिदेव प्रभुणा–

पंचमः पुरुषार्थोऽयं शैवी भक्तिः सनातनी।

नित्यं जङ्गमतुस्टये प्रथमतो नैवेद्यदानं भवेत्
दिव्यं वस्त्रचयं परार्पणधिया गन्धादिलेपः कृतः।
पुष्पाभूषणधारणं चरवरप्रीत्यै मया साधितं
भोक्तव्यं प्रभुमल्लिकार्जुन ! विशिष्टं
जङ्गमस्वीकृतम् ॥ ५९ ॥

चरमुखेनैव लिङ्गतृप्तिर्भवतीति साधयता बसवेश्वरेणैकमागम-प्रमाणमुदाहृतम्-

वृक्षस्य वदनं भूमिः
स्थावरस्य च जङ्गमः। इति

तेनैवोक्तम्-

मूले मुखे क्षितिरुहस्य पयःस्रवेण
वृक्षोपरि प्रकटितं कुसुमं फलं च।
लिङ्गार्पितं चरमुखे सफलं तथैव
क्षीरसङ्गमेश ! नरकश्चरमानभङ्गे ॥

अयमेवाशयः सिद्धान्तशिखामणावपि सूचितः

शिवयोगिनि संतृप्ते तृप्तो भवति शंकरः॥

देहान्तःकरणेषु नास्ति सदयः संसारमग्नो नरः
तद्दत्तं कुसुमादिकं न भवतः प्रीत्यै यदाऽ पावनम् ।
हृत्पद्मे वसतिर्न चापि भवतोऽ फुल्ले सदानिर्मले
किं मे तत् प्रभुमल्लिकार्जुन ! भवान्
येन स्थितो मत्करे ॥ ६० ॥

"शुद्धान्तःकरणो देही पिण्डशब्देन गीयते" इति सिद्धान्तशिखामणिवचनानुसारमन्तरङ्ग शुद्धस्यैव करे शिवोलिङ्गरूपेण राजते। प्राणभावलिङ्गानुसन्धानं विनेष्टलिङ्गधारणं निस्फलं भवति। उक्तं च सिद्धान्तशिखामणौ–

अन्तःस्थितं परं लिङ्गं ज्योतीरूपं शिवात्मकम् ।
विहाय बाह्यलिङ्गस्था विमूढाः इति कीर्तिताः ॥

केचित्ते परलोकलाभरसिकाः केचिज्जगत्कामनाः
केषांचित्सुखमैहिकं न भुवने केषांचिदामुष्मिकम् ।
ये चैते भवतः प्रसादरसिका भक्ता जगद्वन्दिताः
तेषां वै प्रभुमल्लिकार्जुन ! भवेत्सौख्यद्वयं
पावनम् ॥ ६१ ॥

शिवभक्ति पूर्णानां जनानां सौख्यद्वयं संभवतीति साधु भाषितम् । शिवप्रसादरसिकानामैहिकामुष्मिकसुखद्वयलाभो भवतीति शिवमहिम्नः पराकाष्ठां प्रकटयति । पारलौकिक सुखाभिलाषिणां मुनीनावस्था मल्हणस्तोत्रे निरूपिता–

त्वत्पादपूजनरता मुनयो वनेषु
तिष्ठन्ति मूलदलकन्दफलाशिनो ये ।
ते यान्ति मुक्तिपदमीश्वर ! तावदास्तां
धन्यास्तु ते तव मुखान्यवलोकयन्ति ॥

तत्रैहिकसुखाभिलाषिणां भक्तानामवस्था निरूपिता–

प्रोद्दामकाममदिरामदलोलनेत्रा
रत्नावलीझणझणारव रम्यगात्राः ।
ते यक्षलोक वनितासु चिरं रमन्ते
ये त्वां स्मरन्ति सततं मकरध्वजारे ॥

प्राप्तव्यं नरजन्म दुर्लभमिदं शैवी च भक्तिस्ततः
कारुण्यं गुरुसेवया क्षितितले श्रीजङ्गमाद्यर्चनम् ।
शैवानामनुभूतिजन्यसफलं प्राप्तव्यमामुष्मिकं
मुक्तिश्रीः प्रभुमल्लिकार्जुन ! ततो लभ्या
शिवानुग्रहात् ॥ ६२ ॥

कर्मभूमौ मुक्तिसाधनं मानवशरीरं दुर्लभमिति प्रायः सर्वेषां धार्मिकानां दार्शनिकानां चाभिप्रायः। तत्रापि वीरशैव कुलोत्पत्तिरतीव दुर्लभा वर्तते। यतः वीरशैवमतावलम्बिनां जनानां सुखद्वयलाभो भवति। शिवानुग्रहाल्लौकिक सुखेन सार्धं पारलौकिकसुख (मुक्ति) प्राप्तिरपि सुलभावर्तते। उक्तं सिद्धान्तशिखामणौ–

शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः।

शिष्टान्नात्तनुशुद्धिरेव भवतो भक्ताग्रणी नामियं
तेषां संस्मराणाद्विशुद्धम भवच्चित्तं दृशौ दर्शनात् ।
तद्गीत श्रवणात् श्रुतिर्मम शुचिः सद्भावना जीविता
पूजां ते प्रभुमल्लिकार्जुन ! पुनः कृत्वा
मुक्ताभवम् ॥ ६३ ॥

शिवस्य शिवभक्तानां च प्रसाद स्मरणादिभिर्यथा मानवः शुद्धि मेत्रीति सुष्टु निरूप्यते। प्रसादसेवनेन तनुशुद्धिः संस्मरणेन चित्तशुद्धिः दर्शनेन दृष्टिशुद्धिः गीत्श्रवणेन श्रृतिशुद्धिरन्ततो पूजया मुक्तिरिति यदुक्तं, तदतीव युक्तियुक्तम्। शिवशिवेति सकृदुच्चारणादेव मनुजः नरकभीर्ति परिहरतीति मल्हणस्तोत्रे सम्यगुक्तम्–

उक्तं शिवेति शिव येत दिवापि रात्रौ
उत्कण्ठनाद्धरतीति सकृन्मृषापि ।
सत्यं ब्रवीमि सुरनाथ ! न पक्षपातं
मूढोऽपि घोरनरकान्न बिभेति कस्मात् ॥

सर्वाङ्गे शुचिता प्रसादफलतः श्रीमाचिदेवप्रभोः
सद्भक्तिप्रभवं सुखं च बसवामून्यप्रसादोदयात् ।
सुज्ञानार्जनमद्य चेन्नबसवामूल्यप्रसादागमात्
योगस्ते प्रभुमल्लिकार्जुन ! भवद्
भक्ताल्लमानुग्रहात् || ६४ ||

कल्याणनगरस्थितानुभवमण्टपे शिवशरणैः सह वसतिं कुर्वत्या महादेव्या सर्वस्वमपि यथाशुद्धिमेति वचनेऽस्मिन् सविस्तारं निरूपितम्। माचिदेव प्रसादेन तनुशुद्धिः बसवेश्वर प्रसादेन भक्तिशुद्धिः चेन्नबसव प्रसादेन ज्ञानशुद्धिरन्ततोऽल्लमप्रभु प्रसादेन लिङ्गाङ्गसामरस्यरूपमात्यन्तिकं सुखं जायते ।

सद्भाग्यं ह्यसमं भवेदनुदिनं पुण्यं तथाऽलौकिकं
सन्त्येवं भुवि किन्नरादि शरणाः मत्सोदराः सादराः ।
त्वद्भक्ता मम बान्धवाः प्रियतराः मुक्ताः पवित्राः परं
भर्ता मे प्रभुमल्लिकार्जुन ! भवान्
सर्वं शुभं मामकम् ॥ ६५ ॥

किन्नर ब्रह्मादि सोदराः शिवभक्ता असंख्याः बान्धवाः यावत्सन्ति, प्रभुश्चेन्नमल्लिकार्जुन एव यदा पतिर्लभ्यते, तदा तस्या अपि भाग्यशाली नरः को भवितुमर्हति। शिवशरणसहवासेन शिवैक्यमापन्नायाः अक्कमाहादेव्याः भाग्यातिशयोऽत्र स्वयमेव निरूप्यते।

देवानां बसवो भवेद् गुरुवरो मर्त्यप्रपंचे गुरुः
नागानामपि सद्गुरुः स बसवो मेर्वादिशैलप्रभुः।
भक्तानामपि दैवतं स बसवो भाग्योदये लभ्यते
एषोऽपि प्रभुमल्लिकार्जुन ! ममानन्दप्रदं
दैवतम् ॥ ६६ ॥

क्रिस्ताब्दस्य द्वादश शतमाने कल्याणक्रान्तेः केन्द्रबिन्दुः बसवेश्वर इति सर्वेऽपि जानन्ति। तत्कृतमनुपमं कार्यं यदा वीक्ष्यते, तदा महादेवीकृता प्रशंसेयमर्थपूर्णेति ज्ञायते। देवानां मर्त्यानां नागलोकादिवासिनां च बसव एव दैवतमिति यदुक्तं तदतीव समंजसम्। एवं बसवमहिमात्र साधु गीयते। अत एव श्री गुरु बसवलिङ्गाय नमः इति मन्त्रः वीरशैवमते विश्रुतो वर्तते।

नानायत्नकृतौ न चापि तपसा नान्वेषणाद् दुष्कराद्-
अप्राप्यं लभते कुतोऽपि भुवने कालक्रमेणागमः।
दृष्टं श्री बसवेशपादयुगलं लोकाधिकं पावनं
त्वत्प्रीत्या प्रभुमल्लिकार्जुन ! सुखं प्राप्तं
मयालौकिकम् ॥ ६७ ॥

शिवभक्त्या यत्साध्यं, तद् दुस्करैस्तप आदिभिर्न साध्यमिति सुष्टु भणितम्। शिवप्रसादादेव बसवेश्वरदर्शनं प्राप्तमिति महादेवी यद् ब्रवीति, तत्प्रामाण्येन गृह्यताम्। शिवप्रसादाद् बसवदर्शनं, बसवदर्शनाच्छिवदर्शनमिति बीजवृक्षन्यायेन वक्तुं शक्यते।

कैलासः पुरमस्ति लोकविदितं कल्याणनाम्ना श्रुतं
बाह्याभ्यन्तरयोः भवेदिह यतः कल्याणदं मङ्गलम् ।
त्वद्भक्ता इह सन्ति मोक्षरसिका लोकोपकारक्षमाः
प्राप्ताहं प्रभुमल्लिकार्मुन ! पुरं त्वद्भक्त-
बृन्दान्वितम् ॥ ६८ ॥

कल्याणाभिधमेव पुरं द्वादशशतमाने कैलास इति प्रसिद्ध मासित् । यतस्तत्र बसवादि शिवशरणाः सन्तिस्म मोक्षरसिकाः शिवभक्ता यत्र सन्ति तदेव स्थलं कैलास इति वक्तुं शक्यते । आगमोक्तिरेकात्र प्रमाणम्–

चाण्डाल वाटिकायां वा शिवभक्तः स्थितो यदि ।
तच्छ्रेणी शिवलोकस्य तद्गृहं शिवमन्दिरम् ।।

शिवोऽपीदमेवानुमोदते–

मद्भक्ता यत्र तिष्ठन्ति तत्र तिष्ठामि पार्वति ।

आचार्यो बसवः क्षितौ प्रभुरयं लिङ्गं परं चाल्लमः
रामः सिद्ध इहास्ति जङ्गमवरो माचय्यनामा पिता ।
आराध्यः परमो ममात्र बसवः श्रीचन्नपूर्वोः मतः
एतैस्तैः प्रभुमल्लिकार्जुन ! भवाम्याद्या समोदा
समम् ॥ ६९ ॥

शिवशरणमुख्यानां नामानि तेषां च माहात्म्यमत्र महादेव्यत्र सूचयति। बसवेश्वर एव गुरुः, अल्लमप्रभुरेव लिङ्गं, सिद्धराम एव जङ्गमः, चन्नबसव एवराध्यस्तथा माचिदेव एव पिता। एतैः सह वसन्ती महादेवी जीवन्मुक्तिसुखमनुभवतीति वक्तुं साध्यम् ।

लिङ्गस्पर्शनजातशुद्धिरभवल्लिङ्गं मदीया तनुः
लिङ्गैकस्मरणान्मनो मम पुनर्लिङ्गं परं शाम्भवम् ।
लिङ्गे लीनतया स्वयं भवति मद्भावोऽपिलिङ्गं यतः
त्वत्प्रीत्या प्रभुमल्लिकार्जुन !

ततः सर्वाङ्गलिङ्गाकृति ॥ ७० ॥

इष्टादिलिङ्गत्रयस्पर्शादङ्गत्रय सकलं लिङ्गभूतमिति यदुक्तं तदतीवसमंजसम् । लिङ्गपूजारतो भक्तः सर्वार्पणबुद्ध्या सर्वाङ्गलिङ्गाकृतिर्भवति । एषावस्थैव शिवयोगसमाधिस्थल मिति सिद्धान्तशिखामणावप्युक्तम्–

अन्तःक्रियारतस्यास्य प्राणलिङ्गार्चन क्रमैः ।
शिवात्मध्यानसंपत्तिः समाधिरिति कथ्यते ।।

देहे गन्धवति प्रभावसहिते पुष्पादिभिः किं फलं
शान्त्याद्या च समाधिना यदि गुणाश्चेतःस्थिताः
किं फलम् ।
लोकाकारतया स्थितो यदि नरश्चैकान्ततः किं फलं
त्वद्भक्त्या प्रभुमल्लिकार्जुन ! यदा युक्ता
स्वरूपस्थिता ॥ ७१ ॥

प्राणादिलिङ्गसम्बन्धाद् देहेन्द्रियमनस्सु परिशुद्धेषु बाह्यगन्धादिभिः किं प्रयोजनम् । लिङ्गाङ्गसामरस्ये सति, यदा भक्तो जगदाकारतामुपैति, तदैकान्तवासेन किं फलम् । अर्थात् सर्वं शिवमय जगदिति भावयतः शिवयोगिनो बाह्यक्रियादिभिः किमपि प्रयोजनं नास्ति । शिवभवितयुक्तानां प्राणलिङ्गानुसन्धानपराणां जीवन्मुक्तिर्भवतीति सिद्धान्तशिखामणावुक्तम्–

शिवाश्रितानां जन्तूनां कर्मणा नास्ति संगमः ।
वाजिनां दिननाथस्य कथं तिमिरजं भयम् ॥

अङ्गं यावदुपैति लिङ्गपदवीं कं सेवये भूतले ?
चित्तं लिङ्गविधं भवेद्यदि पुनः किं वा स्मरामि क्षितौ।
प्राणश्चापि भजेद्यदि भवल्लिङ्गाकृतिं कं भजे
सर्वं तत् प्रभुमल्लिकार्जुन ! यदा लिङ्गं
वियोगः कुतः ॥ ७२ ॥

सर्वाङ्गलिङ्गस्थितौ शिवयोगिनोऽवस्थात्र प्रस्तूयते। अङ्गमेव पूजकस्थानीयं पूज्यस्थातीयलिङ्गपदवीं यदा भजते, तदा कं पूजयेदिति प्रश्नः समुद्भवति। आचारसंपत्तिस्थलभाजो भक्तस्य जीवन्मुक्तस्य लोकयात्रा निमित्तमात्रं भवतीति सिद्धान्त शिखामणिर्विशदयति–

निर्दग्धकर्मबीजस्य निर्मलज्ञानवह्निना।
देहिवद्भासमानस्य देहयात्रा तु लौकिकी ॥

पृथ्वी येन जिता महाबलयुतो दृष्टो मयैलेश्वरः
माया येन जिता स्वभावनिहिता ब्रह्मेश्वरो मे श्रुतः ।
सत्त्वादित्रिविधं जितं त्रिपुरमुख्यो येन दृष्टोऽन्तकः
दृष्टस्त्वं प्रभुमल्लिकार्जुन ! मया
नन्दीश्वरानुग्रहात् ॥ ७३ ॥

नन्दीश्वरावतारश्रीबसवेश्वरानुग्रहात् एलेश्वरादिमहाशिवशरणा दृक्पथमायाताः। अन्ततो जगदीश्वरः शिवोऽपि दृष्ट इति यदुच्यते, तत् शिवभक्तिसाधनापथप्रगतिं सूचयति। लिङ्ग पूजादिकं कृत्वा शिवदर्शनं यदि भवति सर्वं शिवमयं जगदिति भावना नोपपद्यते, तदा शिवपूजादिकं व्यर्थमिति वक्तुं शक्येत। शिवज्ञानसंपन्नस्य पुरुषस्य बाह्यसंसारसम्बन्धो न विद्यते। उक्तं सिद्धान्तशिखामणौ–

शिवज्ञाने समुत्पन्ने परानन्दः प्रकाशते ।
तदासक्तमना योगी नान्यत्र रमते सुधीः ।।

तत्त्वं चात्मविचारबद्धमधुना चेतोऽतिमात्रं भवेद्
देहातिक्रमणं भवेदनुदिनं स्थूलप्रमाणाधिकम् ।
तर्कागम्यमतश्च भावविषयातीतं परं शाम्भवं
स्पष्टं तत् प्रभुमल्लिकार्जुन !
भवद्योगाप्रमेयं यतः ॥ ७४ ॥

शिवतत्त्वं तर्कादृयतीतमिति सर्वैरपि दार्शनिकैरुक्तम् ।
लिङ्गाङ्गसामरस्यरूपं तत्त्वं तनुमनोभावातीतम् ।
सर्वतत्त्वोपरिगतं लिङ्गमिति सिद्धान्तशिखामणौ सम्यगुक्तम्-
सर्वतत्त्वोपरिगतं सच्चिदानन्दभासुरम् ।
परब्रह्म महालिङ्गं प्राणो जीवः प्रकीर्तितः ॥

लिङ्गाकारमुपैति भक्तनिवहप्राणः प्रसादात्मकः
प्राणाकारमुपैति लिङ्गमधुना ह्यङ्गाभिलाषः कुतः ।
लिङ्गैकाग्रमना यदाहि शरणो निष्पन्दनेत्रो यतः
त्वत्सङ्गे प्रभुमल्लिकार्जुन ! सुखी भूयाज्जगद्-
वन्दितः ॥ ७५ ॥

प्राणादयो यदा लिङ्गाकारमुपयान्ति लिङ्गैकाग्रमनाः शिवयोगी लिङ्गाङ्गसङ्गसुखमनुभवन् जीवन्मुक्तो भवतीति सुष्टु साध्यते। विश्वमखिलं मायाकल्पितमिति ज्ञात्वा शिवयोगी प्राणलिङ्गविलीनो भवतीति सिद्धान्त शिखामणावप्युक्तम्-

मायाविकल्पजं विश्वं हेयं संचित्य नित्यशः ।
चिदानन्दमये लिङ्गे विलीनः प्राणलिङ्गवान् ।।

वेदाः शास्त्रगणाः पुराणनिवहाः शैवागमाः निर्मलाः
सर्वे ते बुसवत् सदा विफलतां यान्त्येव किं तैः पुनः।
चेतश्चंचलतां निहत्य सुधिया योगेन पूर्णो यदा
तावत्ते प्रभुमल्लिकार्जुन ! भवद्भक्तोऽत्र
शून्यस्थितः ॥ ७६ ॥

वेदागमादि पाण्डित्यमन्यसिद्धान्तखण्डनम्।
लौकिकादरलाभाय धनलोभाय केवलम्॥
अन्तरंगेहि मालिन्यं शिवेक्षणनिवारणम्।
योगेन चित्तचांचल्यं वारयन् शिवतां व्रजेत्॥

अर्थादन्तरंगशुद्धिविना प्राणलिङ्गानुसन्धानं च विना वेदादिपठनं व्यर्थमिति यदुक्तं तद् बसवेश्वरोऽपि स्वीय एकस्मिन् वचने सूचयति–

गीतं मनोहरमिदं विदितं तु शास्त्रं
पौराणिकं श्रुतिपथं गतमेव वृत्तम्।
वेदादयोऽपि पठिताश्चरलिङ्गपूजा
श्रीसंगमेश न कृता विफलं तु सर्वम्॥

पुर्णो नैव कदापि घोषमतुलं कुर्याद् घटो मृण्मयः
श्रद्धावान् यदि नैव भूमिवलये संदेहपात्रं भवेत्।
यः प्रीतो मनसा कदापि स्मरणत्यागी भवेन्मानवः
येनापि प्रभुमल्लिकार्जुन ! भवान् प्रीतः
स भक्तः सुखी ॥ ७७ ॥

संपूर्णकुम्भो न करोति घोषं इति सुभाषितवचनानुसारं पूर्णज्ञानी न कदापि गर्जंति। किंचिज्ज्ञं नरं ब्रह्मापि न रंजयितुं शक्य इति साधु भाषितम्।

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति ॥

अर्थात् पूर्णज्ञः घोषं न करोति घटवत् श्रद्धावान न कदापि संदेहं भजते, तथैव येन शिवः प्रीतः स भक्ता सदा सुखी भवति। वेषधारणादिकं सिद्धिकारणं न भवतीति हठ प्रदीपिकायां सुष्ठु भणितम्–

न वेषधारणं सिद्धेः कारणं न च तत्कथा ॥

अङ्गं लिङ्गमुखार्पितं भवति तल्लिङ्गं ह्यनङ्गं यतः
चित्तं ज्ञानमुखार्पितं भवति तल्लीनं परब्रह्मणि ।
भावस्तृप्तिमुखार्पितो यदि भवेत् शून्ये विलीनो यतः
सर्वं कायसुखं सुलिङ्गविषयो लिङ्गाङ्गयोः सङ्गमः ।
दाम्पत्यं सुखदं तयोः पुनरिदं ख्यातं महीमण्डले
प्राप्य त्वां प्रभुमल्लिकार्जुन ! पतिं
चानन्दपूर्णा ततः ॥ ७८ ॥

सर्वार्पणबुद्ध्या कायेन्द्रियादीन् लिङ्गार्पितान् कृत्वा शिवभक्तो लिङ्गरूपो भवति। लिङ्गं पतिः सती भक्तः इति न्यायेन लिङ्गसङ्गसुखमनुभवन् भक्तः आनन्दपूर्णो भवति। सर्वेन्द्रियगतं सुखादिकं शिवार्थं भावयन् भक्तः जीवन्मुक्तो भवतीति सिद्धान्तशिखामणावुक्तम्–

सर्वेन्द्रियगतं सौख्यं दुःखं वा कर्मसम्भवम् ।
शिवार्थं भावयन्योगी जीवन्मुक्तो भविष्यति ॥

नित्यं यः परितुष्टिमोति भुवने नैवेद्यमेवास्य किम् ?
बाह्यान्तःकरणामलस्य सततं स्नानेन किंवा फलम् ?
ज्ञानज्योतिरिदं प्रकाशनपरं दीपार्चनात् किं फलम्
हस्ताग्रे यदि लिङ्गमस्ति परमं चान्वेषणात् किं फलम्
साक्षात्कारतयात्मनः क्षितितले मुक्तिः स्वयं सिद्ध्यति
त्वत्प्राप्तिः प्रभुमल्लिकार्जुन !

सुखं भूयात्समाधिस्थितौ ॥ ७९ ॥

भावलिङ्गानुसन्धानपरस्य भक्तस्य बाह्यक्रियानवश्यकतां सूचयति। प्राणलिङ्गार्चनस्थलवर्णनं कुर्वता शिवयोगिशिवाचार्येण सिद्धान्तशिखामणावुक्तं–

क्षमाभिषेकसलिलं विवेको वस्त्रमुच्यते।
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका॥
पद्मपीठे सुखासीनं चिल्लिङ्गं शिवविग्रहम्।
भावयित्वा सदाकालं भावयेद् भाववस्तुभिः॥

प्रीतिर्मे भवदीयपादयुगले प्रीतिस्त्वदीया मयि
भूयः सङ्गसुखं भवेदनुदिनं स्नेहादुमावल्लभ ।
त्वत्कारुण्यलवात् सुजीवितमिदं लोके त्वदीयासती
सौख्यं तत् प्रभुमल्लिकार्जुन !
लभे लोकोत्तरं शाश्वतम् ॥ ८० ॥

शिवानुग्रहलाभात् शिवप्रीतिवशाच्च भक्तस्यानन्दोऽपरिमितो भवतीति शिवानुभाविनां मतम् । लिङ्गाङ्गसामरस्यरूपा मुक्तिरेव शिवयोगिनां परमं लक्ष्यम् । शिवकारुण्यादेव लोकोत्तरं शाश्वतं च सुखं लभ्यमिति सर्वेषां दार्शनिकानामभिमतम् ।

मत्प्रीतिः पुरुषोत्तमे पुरहरे नीरूपरम्ये सदा
यस्याज्ञां शिरसा वहत्यनुदिनं कालः स्वयं भीकरः।
निस्सीमो भवभीतिमानरहितो यः शम्भुनाम्ना श्रुतः
स त्वं मे प्रभुमल्लिकार्जुन ! पतिर्लोकोत्तरो
नेतरः ॥ ८१ ॥

शिवमेव भर्तारं मन्यमानया महादेव्या तच्छिवस्यानुपममहिमा-वर्णनं क्रियते। कालकालः शिवो लोकोत्तरो वर्तते। कालिदासोऽपि शिवस्यैवेश्वरत्वप्रतिपादनं करोति यथा–

यस्मिन् ईश्वर इत्यनन्यविषयोशब्दो यथार्थाक्षरः।
गीतायामपि भगवतः पुरुषोत्तमत्वं प्रतिपादितम्
अहं लोकेच वेदेच प्रथितोऽस्मि पुरुषोत्तमः।

मातर्भर्तृवियोगदीनमनसा तप्तार्चिषाग्नेर्विना
प्रच्छन्नेन सदैव दुःखमलिना मूढा व्रणेनामुना ।
सौख्यान्वेषणतत्परापि सततं खेदाप्ततायाः क्षितौ
त्वत्प्रीत्या प्रभुमल्लिकार्जुन ! भवाब्धौ
मज्जमाना घने ॥ ८२ ॥

लिङ्गाङ्गदाम्पत्यं शिवमतेऽनुपमं वर्तते। दम्पत्योः कदापि विरहोजायते। तेन विरहेण जाया भृशं पीड्यते इति लोकानुभूतिः। अनयैव सरण्या महादेव्यत्र स्वीयंविरहजं दुःखातिशयं सूचयति। विनाग्निं ज्वलनं प्रच्छन्नव्रणवेदनेत्यादिः विरहानुभवोऽत्र व्यज्यते। विरहानलदग्धा सती पत्यन्वेषणे यदि मग्ना भवति, अर्थात् लिङ्गपूजानिरता भवति, तदैव शिवप्राप्तियोग्यतास्याः संभवति। भक्तेरुत्काटावस्थात्र स्फुटीकृता ॥

आयातीति पथः प्रदक्षिणपरा तृष्णादिमुक्तादरा
यावन्नेति मदन्तिकं गिरिसुताकान्तश्च खेदोदयः।
कालक्षेपकरो यदा स भविता दौर्बल्यपूर्णा तथा
विच्छिन्ना प्रभुमल्लिकार्जुनवियुक्ता
चक्रवाकी यथा ॥ ८३ ॥

दाम्पत्यादर्शपरिचयार्थं चक्रवाकदम्पती कविसमये विख्यातौ। चक्रवाकी स्वकान्तं क्षणमप्यपश्यन्ती करुणं कूजति। एवमेव–

स्वीयकान्तागमासक्ता भक्तरूपा सतीक्षितौ।
तदर्थं त्यक्तनिद्रादिर्दूयते विवशाऽमला ॥

ईश्वरमार्गनिरीक्षणं कुर्वतो भक्तस्य तस्यागमनानुपस्थितौ यावती वेदना भवति, तस्या वर्णनमशक्यप्रायमेव ॥

कामानुग्रहकांक्षिणी क्वचिदहं शर्वानुरक्ता पुनः
ताराराथमुमेशसंगरहिता याचे सुधांशुं क्षणम् ।
धिग् धिक् शम्भुवियोग शून्यहृदयं धैर्यच्युतं मामकं
दीनाहं प्रभुमल्लिकार्जुन ! कथं याचे
समस्तं जनम् ॥ ८४ ॥

कामपीडिता विरहाग्निदग्धा सती लोके चन्द्रादिशिहृद्‌पन-विभावैः भृशं पीड्यमाना दयनीयावस्थां नीयमाना कामेन लोककृपापात्रं भवतीति प्रथितं पृथिव्याम् । पारलौकिकं पति शिवमपश्यन्ती तदर्थमत्यन्तौत्सुक्यपूर्णा महादेवी तथैव परवशा भूत्वा शोचनीयस्थितिमनुभवति ।

दृष्ट्वा त्वां पुनरक्षियुग्ममतुलप्रेम्णाच्च संमीलितं
श्रुत्वा त्वद्वचनं नितान्तमधुरं नष्टा स्मृतिर्मामिका।
शय्या मार्दवभाग् मया न गणिता त्वद्दर्शनोत्कंठया
आत्मापि प्रभुमल्लिकार्जुन ! भवत्सङ्गे
मया विस्मृत. ॥ ८५ ॥

पतिसमागमे भार्याया या दशा लोके दृश्यते, सात्र सुष्टु वर्णिता। कान्तं वीक्ष्याक्षियुगलनिमीलनं क्रियते, तद्वच: श्रुत्वा स्मृतिर्नश्यति। शय्यामार्दवं नैव गण्यते। समागतया तया स्वात्मापि विस्मर्यते। दाम्पत्यप्रीतिपराकाष्ठात्र सम्यग् निरूपिता। प्रथमसमागताया मुग्धनायिकाया: वर्णनमिदमिति वक्तुं शक्यते। प्रथमसमागमे पार्वत्या अवस्था कालिदासेन कुमारसम्भवे इत्थं वर्ण्यते–

व्याहृता प्रतिवचो न संदधे
गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयने पराङ्गमुखी
सा तथापि रतये पिनाकिन:॥

पारलौकिकमद्भुतं दांपत्यसुखमस्मिन् वचने साधु वर्णितम्।

चित्तं मे प्रसभं विलोभितमहो प्राणप्रियेन त्वया
व्याप्तं मे सकलं शरीरमधुना कन्दर्पदर्पान्तक ! ।
येनेदं ह्यतुलं सुखं क्षितितले स्वर्गाधिकं साधितं
एतन्मे प्रभुमल्लिकार्जुन कृपा प्रीत्येकला-
भात्मकम् ॥ ८६ ॥

पूज्येस्वनुरागः भक्तिरिति भक्तेः सामान्यस्वरूपं निरूपितम्। सोऽनुरागो दृढीभूय सामरस्यभक्तिनाम्ना प्रथितो भवति। तदानीं लिङ्गैक्यं सभवति येनातुलं स्वर्गाधिकं सुखं लभ्यते। कन्दर्परिपुमेव प्रति मोहितो भक्तस्तस्मिन्नेव लीनो भवितुमिच्छति। भक्तिपराकाष्ठात्र सूच्यते। भगवदनुग्रहेण संजाता भक्तिः शिवजीवसामरस्यजन्मनि पर्यवस्यातीति वीरशैवसिद्धान्तसार एवात्र निरूपितः।

उत्थाय स्मरणं करोमि भवतः प्रातः प्रमोदप्रदं
सर्वामङ्गणभूमिमद्य विमलीकृत्य प्रमादादिकम् ।
हित्वा चागमनप्रतीक्षणपरा त्वत्पादरेणुस्पृहा
कारुण्यात् प्रभुमल्लिकार्जुन ! कदा
मामुद्धरस्यागतः ॥ ८७ ॥

पतिव्रता यथा नारी पत्यागमनकौतुका ।
सती सुभक्तरूपासौ शिवमार्गं प्रतीक्षते ॥
सर्वदा शिवनामादिकीर्तनं स्मरणं सदा ।
प्रमादमखिलं हित्वा तन्मयीभावयोगतः ॥
शरणागतिविशुद्धात्मा सर्वार्पणमतिः शुचिः ।
सेवते सर्वलोकेशमनन्यभक्तियोगतः ॥

रे रे पक्षिगणाः शुकाः सुमधुरैः गीतैर्युता कोकिलाः
युक्ता मन्द्ररवेण पुष्पनिकरे पानंकराः षट्पदाः ।
किं दृष्टः स भवद्भिरत्र विपिने नाथो मदीयोऽमलः ।
संसारे प्रभुमल्लिकार्जुनरता याचे
मयूराः सदा ॥ ८८ ॥

सर्वत्र शिवदर्शनं शिवभक्तिफलपराकाष्ठा । तत्पूर्वं शिवदर्शनार्थं भक्तश्चिन्ताकुलो भवति । अतो मयूरादिपक्षिगणं पृच्छति भवद्भिः प्रभुमल्लिकार्जुनो दृष्टः किमिति । अनेन शिवदर्शनातुरता व्यज्यते ।

शैले नर्तनतत्परः शिखिगणः किं जीर्णघासाश्रयः ?
हंसः पद्मगणालयः वसति किं कासारतोयाश्रये ?
निर्गन्धं कुसुमं कदाप्यलिकुलं वाकांक्षते सुन्दरं
फुल्ले चूतसुमे सदैव मधुरं कूजन्ति ते कोकिलाः
हित्वा त्वां प्रभुमल्लिकार्जुन ! कुतः सौख्यं
लभे भूतले ॥ ८९ ॥

क्षीणपापः शिवभक्तिमान् नरः शिवं हित्वान्यद् दैवतं न भजते। एतदर्थमुदाहरणचतुष्टयं दीयतेऽस्मिन् वचने।

1) शैले नर्तनपरः शिखी जीर्णघासाश्रयं न करोति।

2) पद्माकरे वसन् हंसः कासारतोये रतिं न कुरुते।

3) अलिगणो निर्गन्धकुसुमाभिलाषं न करोति।

4) चूतवृक्षे कुसुमिते कोकिलः कूजति। शिवाधिक्यमत्र ध्वन्यते।

संगः संजयनयेत् हुताशनमितो बीजांकुरं भूतले
फुल्ले पुष्पगणे च संगजनितं प्राप्तोदयं सत्फलम् ।
संगः संजजयत्यलौकिकसुखं दाम्पत्यतुष्टे नरे
भक्तानां प्रभुमल्लिकार्जुन ! सुखं संगं
सतां कांक्षये ॥ ९० ॥

भक्तानां संगवाञ्छा भविनां च वर्जनं शिवभक्तस्यानिवार्यम् । शरणसंगात् शिवदर्शनरूपं फलं भवतीति लौकिकोदाहरणद्वारा विशदीक्रियते । भूतले बीजांकुरार्थमग्निसम्पर्कोऽनिवार्यः । पुष्पगणसंसर्गादेव फलोदयः । दाम्पत्यतुष्टे नरे समागमः सौख्यमलौकिकं जनयति । अत एव शिवभक्तः स्वमार्गस्थितैः सहैव संगं करोतीति सिद्धान्तशिखामणिर्निरूपयति–

शिवभक्तो महातेजाः शिवभक्तिपराङ्मुखान् ।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत्क्वचित् ॥

वन्ध्या न प्रसवव्यथामनुपमां जानाति गुर्वीमपि
वात्सल्यं तु विमातृचेतसि कथं भूयाद् घृणानिर्भरे।
ये वा लौकिकदु:खदीनहृदया: जानाति कस्तद्गतिं
के वा मे प्रभुमल्लिकार्जुनवियुक्ताया:
विदुर्वेदनाम् ॥ ९१ ॥

'नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्' इति सूक्तिमनुसृत्य विरहव्यथानुभवं विनाकोऽपि विरहिणां वेदनां ज्ञातुं न शक्नोति। विमातुः घृणानिर्भरे मनसि वात्सल्यं कदापि न भवति। लौकिकदु:खदीनहृदयानां गतिं यदा न कोऽपि जानाति, तदाऽलौकिकविरहव्यथां भक्तस्य शिवविरहितस्य ज्ञातुं कथं शक्यते। अवर्णनीयमनुभववेद्यं च दु:खमत्र द्योत्यते। ईश्वर वियुक्तस्य जीवस्य व्यथां कबीरदास इत्थं वर्णयति–

स्वामिन् वियोगविधुरा विकला मदीया:
प्राणा: भवन्ति विवशा: विरहाग्नितप्ता:।
शान्तिं पुनर्मरणजां कृपया प्रयच्छ
संदर्शनेन सुखदो भव वा महेश!

कंदर्पो बहुदर्पवानिति भवन्नेत्राग्निदग्धोऽभवत्
कालो गर्वलवान्महाजडमतिः पादाग्रसंताडितः ।
ब्रह्मैकेन तथा स्वकीयशिरसा भ्रष्टोऽभवद् गर्वितः
विष्णुश्चाप्यतिगर्वितो भवति यद् गोपालकोऽनाथवत्
तत्त्वं मे प्रभुमल्लिकार्जुन ! भवस्यन्यादृशो
वल्लभः ॥ ९२ ॥

स्वीयवल्लभस्य शिवस्य महिमातिशयं कतिपयपौराणिक घटनाद्वारा निरूपयति–

1) कन्दर्पः दर्पितोऽग्निनेत्रजन्मना वह्निना दग्धः ।

2) कालोऽपि बहुगर्वितः पादाग्रताडितः ।

3) ब्रह्मा स्वीयेनैकेन शिरसा विरहितः ।

4) विष्णुश्च गोपालको जातः ।

मायां सा पुरुषार्थमल्पविषया रामा रमासुन्दरी
मायासौ युवतीगणार्थमधुना सौन्दर्यपूर्णो नरः।
मायाबन्धनपीडितं जगदिदं भक्तं जडं मन्यते
त्वद्भक्तः प्रभुमल्लिकार्जुन !
पुनर्मायाविमुक्तो भवेत् ॥ ९३ ॥

नारीरूपेण माया नरं कर्षति बध्नाति च। नारीं सुंदराङ्ग-पुरुषरूपेण कर्षति। किन्तु शिवभक्तः मायामेनांजित्वा बन्धन मुक्तो भवति। विवेकिनः संसारदुःखदूरीकरणे मतिर्जायते इति सिद्धान्तशिखामणावुक्तम्–

विवेकिनो विरक्तस्य विषयेष्वप्यरागिणः।
संसारदुःखविच्छेदहेतौ बुद्धिः प्रवर्तते ।।

सर्वं वेदितुमस्ति किं छलमिदं ह्यात्मातिरिक्तं क्षितौ
व्यर्थं सर्वमिति प्रमादजनितं स्वीयप्रबोधे रुचिः ।
आत्मज्ञानवतः प्रमाणमितरन्मायावृतं निष्फलं
त्वद्बोधात्प्रभुमल्लिकार्जुन रतिश्चेतो
भवा मे प्रभो ॥ ९४ ॥

एकेन ज्ञातेन सर्वं ज्ञातं भवतीति न्यायेनात्मज्ञानं विना सर्वमपि व्यर्थमिति साधु भणितम् । अन्तःस्थं परमात्मानं विहाय तं यत्र कुत्रापि यद्यन्वेषयति नरस्तदतीवमौढ्ययुक्तं भवति । उक्तं च कबीरदासेन—

अान्वेषणे यस्य जगद्भ्रमस्ते
शरीरवासी तव देवदेवः ।
मायावृत्तो यावदयं हि लोके
ज्ञेयो न तावद् भवता महेशः ॥

जाता श्रीगुरु पाणिसद्मनि पुनस्त्वद्भक्तसंवर्धिता
भावक्षीरमुखैः सदामृतमयैः पुष्टा च तुष्टा यतः ।
शम्भुर्मे दयितो विवाहविधिना प्राप्तो दयासागरः
भक्तानां प्रभुमल्लिकार्जुनधवा श्रीपादपूजारता ॥ ९५ ॥

हस्तमस्तकसंयोगरूपेण शक्तिपातेन युतस्य दीक्षाविधेः प्रभावेण भक्तो गुरुकरसंजात इति कथ्यते। एवं शिवभक्तो द्विज इति वक्तुं शक्यते। यस्य पिता श्रीगुरुः, बान्धवा शिवशरणा ईश्वर एव पतिः स एव भक्तः धन्यो मुक्तिभाग् भवति।

संप्राप्ता भवतापदीनमनसा दूराद् भवन्तं पुनः
मा दूरीकरु सेविकामनुदिनं त्वत्पादमग्नामिमाम् ।
त्वत्कारुण्यविलोभनं मम हृदि प्राबल्यवद् वर्तते
ऐक्यं मे प्रभुमल्लिकार्जुन ! भवेद् विश्रान्तिपूर्णं
त्वया ॥ ९६ ॥

साधनापक्षेऽविश्रान्तं प्रयतमानाया महादेव्या इयमन्तिमेच्छा यत् 'शिवैक्यं मे भवतु' इति। गुरुकारुण्याद् भवतानुग्रहाच्च शिवसमीपं गतायाः शिवदर्शनं कुर्वत्याश्चाभिलाषोऽयं दार्शनिक-प्रगतिपराकाष्ठां द्योतयति। अद्वैतभावनासुखमनुपममिति सिद्धान्तशिखामणिः सूचयति–

अद्वैतभावनाजातं क्षणमात्रेऽपि यत्सुखम् ।
तत्सुखं कोटिवर्षैस्तु प्राप्यते नैव भोगिभिः ।।

दीपो दीपविभिन्नतां भजति किं क्षीराद् विभिन्नं घृतम् ?
जीवेशादिविभेदनं भवति किं चाध्यात्मसिद्धे यतौ।
दीक्षायाः गुरुणा पवित्रितमिदं शक्त्याङ्गलिङ्गाद्वय-
संयुक्ता प्रभुमल्लिकार्जुन मतिभ्रष्टा

ततोऽहं त्वया ॥ ९७ ॥

शिवाद्वैतभावनैव मुक्तिकारणमिति वीरशैवमतावलम्बिना-मभिमतम्। शिवाद्वैतपरमेव ज्ञानमिति सिद्धान्तशिखामणा-वुक्तम्–

शिवाद्वैतपरं ज्ञानं ज्ञानमित्युच्यते बुधैः।

तत्रैवोक्तम्–

शिवभावनया युक्तः स्थिरया निर्विकल्पया।
शिवो भवति निर्धूतमायावेशपरिप्लवः॥

सेयं मे कदली तनुः सविषया चित्तान्विता भौतिकी
घोरारण्यमयं भवः स एक कदली बन्धोद्यमे सक्रिया।
तां जित्वा कदलीं भवामि कदलीकान्तारवेश्मस्थिता
तप्तायाः प्रभुमल्लिकार्जुन सपद्यालिङ्गनं
देहि मे ॥ ९८ ॥

कदलीकान्तारं भौतिक शरीररूपं प्रविष्टस्य नरस्य दुःखानल दग्धस्य परिश्रान्तस्य शिव आलिङ्गनादुपशमं करोतु इति भक्तप्रार्थना। आरम्भे आर्तरूपोऽपि शरणोन्ते ज्ञानीति वक्तुं शक्यते। कदलीकान्तारजयं विना शिवानुग्रहो न शक्यते। उक्तं च सिद्धान्तशिखामणौ–

शिवोऽहमिति यस्यास्ति भावना सर्वगामिनी।
तस्य देहेन संबन्धः कथं स्यादमितात्मनः॥

मुक्ता वारिमया च सैन्धवमिदं वर्षोपलो वारिणा
जायेते पुनरङ्कुतं क्षितितले मुक्तैव पानीयताम्।
नायाति प्रसभं जले विनिहिता संसारिणो लिङ्गिनः
त्वत्संगात्प्रभुमल्लिकार्जुन ! ततो
लिङ्गैकलीनापुनः ॥ ९९ ॥

मुक्ता वारिजाता सैन्धवं वारिसंजातं वर्षोपलोऽपि जलनिर्मितः किन्तु मुक्ता कदापि पानीयतां न भजते। एवमेव लिंगिनो भक्तस्य भविता न संभवति।

एतस्मिन् विपिने वनस्पतिगणः कल्पद्रुमः शोभते
सर्वो भूवलयः विमुक्तिसदनं पानीयमेतत्सुधा ।
पाषाणः कदलीवनेऽपि सकलश्चिन्तामणिर्भासुरः
एषाहं प्रभुमल्लिकार्जुन ! भवद्रक्ता
विरक्ता गता ॥ १०० ॥

लिङ्गाङ्गसामरस्ये करस्थे सति सर्वं जगदिदं शिवमयं भासते। वनस्पतिगणः सर्वोऽपि कल्पद्रुमायते। भूमण्डल एव मुक्तिक्षेत्रं भवति। पानीयं सर्वं सुधा भवति। पाषाणश्चिन्तामणिर्भवति। एवमेव भक्तः शिवसमो शिवसमागतो भवति। उक्तं सिद्धान्त-शिखामणौ–

शिवप्रसादसंपत्त्या शिवभावमुपेयुषा।
शिवादन्यज्जगजालं दृश्यं तेनन दृश्यते ।।

लिङ्गं कुत्रनु लिङ्गसङ्गजनितं सौख्यं कुतो वर्तते ?
कावा भिन्नतया तवेति ममसां प्रज्ञा विरोधिन्यतः ।
का बुद्धिः प्रभुमल्लिकार्जुन सुखं नास्त्यद्वित वा संगमात्
निःसङ्गं नहि सङ्गमेव न पुनर्जानामि
संयुक्तयोः ॥ १०१ ॥

लिङ्गैक्यनिष्ठस्याङ्गस्यावस्थात्र निरूपिता। शिवजीवाभेद बुद्धिनात्मनि मुक्तिलाभो भवति। मुक्तिलक्षणं सिद्धान्त-शिखामणावुक्तम् -

जले जलमिव न्यस्तं वह्नौ वान्हिरिवार्पितः।
परब्रह्मणिलीनात्मा विभागेन न दृश्यते ॥

— श्लोकानुक्रमणिका —

श्लोकादिः	पृष्ठ संख्या	श्लोकादिः	पृष्ठ संख्या
अङ्गं यावदुपैति	80	छिन्नः सव्यथ	49
अङ्गलिङ्ग	86	जाता श्रीगुरु	103
अन्तःस्थः पतिरस्ति	61	जाताइं भुवि	8
अन्धोलूकगणो	48	जेतुं सा नहि	5
आचार्यो बसवः	77	तत्त्वं चात्म	82
आयातीति	91	त्वज्ज्ञानेनसमं	51
आयुर्भोगकरी	24	त्वद्भवतेक्षण	65
उत्थाय स्मरणं	95	त्वद्भक्तैः सह	63
एकं मे च	6	दण्डाग्रंच नटन्	27
एतत्सर्ववने	108	दाता मे गुरुरस्ति	21
कन्दर्पो बहु	100	दीपो दीप	105
कल्याणाभिध	64	दुग्धं वेश्मनि	59
कामानुग्रह	92	दृष्ट्वा त्वां	93
कासारं तृषितं	20	देवानां बसवो	74
कान्तस्त्वं भव	22	देहान्तः करणेषु	68
किं भीतेन फलं	52	देहे गन्धवति	79
केचित्ते पर	69	देहोपद्रवकारिणी	3
कैलासः पुरमस्ति	76	न त्वं मद्वचनं	42
कैवर्तो जलवासिनः	50	नानायत्नकृतो	75
क्रीडार्थं सकलं	9	नानायोनिसमुद्भवा	14
क्रीडा सर्पगणेन	39	नित्यं जङ्गम	67
ग्रावाघर्षणजन्य	31	नित्यं यः	87
चित्तं मे	94	पादाब्जाद्वितयं	25
चिन्ता मे	29	पानीयाख्यविशाल	23
छाया नास्ति	47	पाषाणोदरवर्ति	1

श्लोकादि:	पृष्ठ संख्या
पीडा या मरणस्य	36
पूर्णोनैव	85
पृथ्वी येन	81
प्रच्छन्नस्तन	43
प्राप्तव्यं नरजन्म	70
प्रीतिर्मे भवदीय	88
भाले भस्म	26
भीरोऽस्ति कृत:	46
भुक्तं वृक्षफलं	54
भूमिर्भूमि समागता	18
मत्प्रीति: पुरुषौ	89
मद्भाग्यं	73
मातर्भर्तृ	90
मातापितृविहीन	41
माया सा पुरुषं	101
मुक्ता	107
मूत्रामेध्यघटो	12
य: शम्भुं	40
यद्गीतश्रवणं	35
यद् वा भावि	53
यावत्तत्	57
यावत्प्रेम भवेत्	28
ये चाङ्गादि	32
रत्नाढ्या यदि	33
रे रे पक्षि गणा:	96
लिङ्गस्पर्शेन	78

श्लोकादि:	पृष्ठ संख्या
लिङ्गाकार	83
लिङ्गार्थं परिधान	38
लिङ्गोद्भूति	34
लिङ्गं कुत्रनु	109
लोकानां विविध	16
वन्ध्या न प्रसव	99
वित्तादि त्रितयं	66
वेदा: शास्त्रगणा:	84
शिष्टान्नात्तनु	71
शीलज्ञानमिदं	62
शुष्कं वास्तु	58
शैले नर्तन	97
श्रान्ताहं भव	37
सङ्ग: संजनयेत्	98
सङ्घातच्युत:	15
सन्यास: भवतोऽस्ति	44
संसारार्तिरियं	7
सर्पोऽसौ मुरली	56
संप्राप्ता भव	104
सर्वं वेदितुमस्ति	102
सर्वाङ्गे शुचिता	72
सेयं मे कदली	106
स्वस्नेहात्कृत	10
क्षुत्क्षामा यदि	55
क्षुत्क्षामा विपिने	45

— शुद्धिपत्रम् —

पृष्ठ संख्या	पंक्ति संख्या	अशुद्ध	शुद्ध
9	2	नान्मा	नाना
9	15	मवेश्वर	महेश्वरः
10	2	दू:खतश्च	दु:खितश्च
17	2	न्नीतस्त्वया	न्नीतास्त्वया
19	3	मेवमस्माकं	मेवास्मकं
20	4	आचार्य	आचार्य:
21	3	तैर्दंता	तैर्दत्ता
22	6	लिङ्ग:	लिङ्गं
28	4	मुक्ता	मुक्ता
32	8	अङ्विकार	अङ्गविकार
33	18	तत्तत्वा	तत्त्यक्त्वा
36	5	स्त्वत:	उत्त्वत:
38	3	कृतकुत्य	कृतकृत्य
40	3	स्वशिरसच्छेद	स्वशिरश्छेदं
42	2	नोत्कंटिता	नोत्कंठिता
47	14	संकारो	संकाशे
59	10	लिङ्गे स्थावर	लिङ्गंस्थावर
59	11	शरकत्	शश्वत्
66	1	समप्यामलं	समप्र्यमिलं
67	2	पोशार्पण	चरार्पण
71	4	कृत्वा	कृत्वाच
72	2	बसवामून्य	बसवामूल्य
85	1	पुर्णो	पूर्णो
91	12	शकद	शक्य